कालाग्निरुद्राय। आधारशक्त्यै मूलप्रकृत्यै कूर्माय वराहाय अनंताय पृथिव्यै क्षीरोदार्णवाय श्वेतद्वीपाय
कल्पवृक्षाय स्वर्णमंडपाय रत्नसिंहासनाय नम इत्युपरि संपूजयेत्। तदुपरि चतुरस्रं पीठं परिकल्प्य धर्माय

ज्ञानाय। वैराग्याय ऐश्वर्याय नम इति पीठगात्रेषु पूजयेत्। तं तमसे। रं रजसे। सं सत्त्वाय। वह्नि
मंडलाय सूर्यमंडलाय सोममंडलाय। आं आत्मने। अं अंतरात्मने। पं परमात्मने। ज्ञां ज्ञानात्मने। मां मा
यातत्त्वाय। विं विद्यातत्त्वाय। पं परतत्त्वाय नम इत्युपर्युपरि पीठमध्ये पूजयेत्। तदुपरि अष्टदलं कम
लं परिकल्प्य तस्य पूर्वदलमारभ्य। ॐ विमलायै नमः। ॐ उत्कर्षिण्यै। ज्ञानायै। योगदायै। प्रह्व्यै। सत्या
यै। ईशानायै नम इति पूजयेत्। अनुग्रहायै नम इति पीठमध्ये पुष्पांजलिमादाय। ॐ नमो भगवते सर्व
भूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नम इति पीठं संपूज्य। कमलकर्णिकायां देवमा
वाह्य आचमनीयार्घ्यचमनीय मधुपर्काचमनीयस्नानाचमनीयवस्त्राचमनीयगंधपुष्पांजलित्रयकृत्वा
हुत धूपदीपनैवेद्यानि समर्पयेत्। ततोंगावरणे। ॐ नमो नारायणाय हृदयाय नमः। ॐ नमो नारायणा
य शिरसे स्वाहा। ॐ नमो नारायणाय शिखायै वषट्। ॐ नमो नारायणाय कवचाय हुं। ॐ नमो नारायणाय
अस्त्राय फट्। ॐ नमो वासुदेवाय। सं संकर्षणाय। प्रं प्रद्युम्नाय। अं अनिरुद्धाय नम इति दिक्षु पूजयेत्। कां कांत्यै। शां शांत्यै

श्रियै।सरस्वत्यैनमःइतित्रिकोणेषुपूजयेत्।चक्रायशंखायगदायैपद्मायकौस्तुभायमुशलायखड्गायव
नमालायैनमःइतित्रिकोणेषुपूजयेत्।ध्वजायवैनतेयायशंखनिधयेपद्मनिधयेनमःइतिदिक्षुविघ्ना
यआर्यकायदुर्गायैविष्वक्सेनायनमःइतिविदिक्षु।अथावरणक्रमः।तद्बहिरग्रेगरुडंतद्दक्षिणोत्तरना
गेशंखपद्मनिधी।पश्चिमेध्वजं।आग्नेय्यांविघ्नेशं।नैरृत्येआर्यां।वायव्येदुर्गां।ईशानेसेनान्यंचपूजये
त्।ततइंद्रादीन्पूजयेत्।सर्वमंगप्रथमावरणंकुर्वंति।द्वितीयंवासुदेवादिभिः।तृतीयंशांत्यादिभि
चतुर्थंकेशवादिभिः।पंचममिंद्रादिभिः।केचित्तुप्रथममंगैः।द्वितीयंवागादिभिः।तृतीयंचक्रादिभिः
चतुर्थंध्वजादिभिः।पंचमंकेशवादिभिः।षष्ठमिंद्रादिभिः।सप्तमंतदस्त्रैः।केचित्तुप्रथममंगावरणं।
वासुदेवादिभिर्द्वितीयं।तृतीयंचक्रादिभिः।चतुर्थंध्वजादिभिः।पंचममिंद्रादिभिः।इत्थंचत्वारःप्रका मंत्र
राः।एतेषामेकेनप्रकारेणपूजांकुर्यात्।अष्टाक्षराणांमहोमूर्तयःसंति।तासांवर्णाः।सिंदूरकुंद ९९
करविंदबंधुजीवकाश्मीरपद्मकरंदरुचः।क्रमेण।नीलोत्पलांबुदरागसमानमूर्तयोष्ट

कथितामनुवर्णजाताः।तत्रशंखचक्रगदापद्मानिदक्षिणोर्ध्वहस्तमारभ्यप्रादक्षिण्येनबोद्धव्यानि।नका
रमूर्त्याश्चक्रशंखौध्येयौ।प्रधानमूर्तिर्मध्येध्येया।अन्यासप्तमूर्तयःपूर्वादिसौम्यपर्यंतंतेषुपूज्याः।अवशिष्टे
शानकोणेओंकारमूर्तिरेवपूज्यानान्या।अथयोगपीठेप्रणवाद्यक्षरमूर्तिमिंद्रवारुण्यामावाह्यपूजयेत्।प्र
थममंगावरणं।द्वितीयमक्षरायतनमूर्तिभिः।तृतीयंवासुदेवादिभिः।चतुर्थंशांत्यादिभिः।आत्मादिभिर्नि
वृत्त्यादिभिश्चपंचमं।इंद्रादिभिःषष्ठंवज्रादिभिःसप्तमं।नकारमूर्तिपूजायां।प्रथममंगैः।द्वितीयंवर्णमू
र्तिभिः।तृतीयंवासुदेवादिभिः।चतुर्थंशांत्यादिभिः।पंचमंध्वजादिभिः।षष्ठमिंद्रादिभिः।मोकारमूर्तिपूजा
यां।प्रथममंगैः।द्वितीयमक्षरमूर्तिभिः।तृतीयंरतिधृतिकांतितुष्टिपुष्टिस्मृतिदीप्तिकीर्तिभिः।चतुर्थं
ध्वजादिभिः।पंचमंलोकपालैः।राकारादिमूर्तिपूजायां।प्रथममंगैः।द्वितीयमष्टमूर्तिभिः।तृतीयं।श्रि
यै।भुवे।मायायै।मनोन्मन्यै।क्रियायै।रत्यै।पुष्ट्यै।मोहिन्यै।योगमायायै।चतुर्थंलोकपालैः।यकारमूर्ति
पूजायां।प्रथममंगैः।द्वितीयमष्टमूर्तिभिः।तृतीयंशंखचक्रगदाहलशार्ङ्गमुशलखड्गशरैः।चतुर्थंलो

कपालेः।णाकारमूर्त्तिश्रिजायां।प्रथममंगेः द्वितीयमष्टमूर्त्तिभिः।तृतीयमेभिः।शेषायवासुकयेतक्षकाय
कर्कोटकायपद्मायमहापद्मायदरपालायकुलिकायशंखाय।चतुर्थमिन्द्रादिभिःस्वमूर्त्तिश्रिजायां।प्र
थममंगैःद्वितीयंवत्समूर्त्तिभिःतृतीयेंशात्पादिभिःध्वजादिभिश्चतुर्थे।पंचममेभिः।मत्स्यायकूर्मायवाराहा
यनरसिंहायवामनायत्रिरामायकल्किने।अंतरात्मनेषष्टे।शेषादिभिःसप्तमंलोकपाले।अष्टमंवज्राद्यैः
एवंप्रकारैःसंपूज्यजपित्वानिवेद्यदेवंविसर्जयेत्।प्रसीददेवेशशरण्यपुरुषोत्तम।यत्पूजितंमयादेवपरिपूर्णं
तदस्तुमे।संहारमुद्रयासंहृत्यात्मनिषडंगानिविन्यस्यमानसैरुपचारैःसंपूज्ययथासुखंविहरेत्।द्वात्रिंश
ल्लक्षंपुरश्चरणं।तद्दशांशंतस्माधमिपिवा।तथोक्तं।प्रथमेनतुलक्षेणआत्मशुद्धिर्विधीयते।द्वितीयेनतुलक्षे
णमंत्रसिद्धिमवाप्नुयात्।तृतीयेनतुलक्षेणस्वर्गलोकमवाप्नुयात्।चतुर्थेनतुलक्षेणहरेःसामीप्यमाप्नु मंत्र·
यात्।पंचमेनतुलक्षेणनिर्मलंज्ञानमाप्नुयात्।षष्टेनैवतुलक्षेणनवेदविष्णौस्थिरामतिः।सप्तमेनतुलक्षेणस्व २००
रूपंप्रतिपद्यते।अष्टमेनतुलक्षेणनिर्वाणमधिगच्छति।धत्त्रष्टद्रव्यैमधुराक्तैर्दशांशेहोमःपर्युषैर्वा।इतिमं।

श्रजयेद्विष्णुप्रोक्तैरावरणैःसदा।धर्मार्थकामानलस्यंतेविष्णोःसायुज्यमाप्नुयात्।अथद्वादशाक्षरोमंत्रः।ॐन
मोभगवतेवासुदेवाय।अस्यमंत्रस्यप्रजापतिऋषिःदेवीगायत्रीछंदोविष्णुर्देवता।ॐबीजं।आयशक्तिः इष्टार्थे
विनियोगः।ॐहृदयायनमः।नमःशिरसेस्वाहा।भगवतेशिखायैवषट्।वासुदेवायकवचायहुं।सर्वस्तेवास्त्रा
यफट्।इतिपंचांगानंतरंअक्षरन्यासः।शिखाललाटनेत्रास्यगलदोःकुक्षिलिंगजानुपादेषुइतिविन्यस्यध्यानं
कुर्यात्।हरिमुद्यत्सुचक्रगदाशंखगदाकुलदोःपरिघंमितपद्मगतं।वलयांगदहारकिरीटधरंनवकुंदरुचं
णमामिसदा।दक्षिणाधःकरमारभ्यगदाशंखचक्रपद्मानिध्येयानि।एवंध्यात्वामानसिकपूजांतरंनारायणमं
त्रोक्तपीठेदेवमावाह्यपाद्यादिभिरुपचारैःपूजयेत्।अंगेःप्रथमावरणं।वासुदेवायसंकर्षणायप्रद्युम्नायानि
रुद्धायइतिमर्वदिक्षु।शांत्यैनमः।श्रियै।सरस्वत्यै।रत्यैनमइतिकोणेषु।इंद्रोकपालेश्चतुर्थी।द्वादशलक्षंपुरश्चरणं।
तद्दशांशेनहोमः।।लक्ष्मीनारायणमंत्रश्चतुर्दशाक्षरः।ॐक्लींक्लींश्रीश्रींलक्ष्मीवासुदेवायनमः।ॐबीजं।
क्लींशक्तिःइष्टार्थेविनियोगः।ॐक्लींक्लींहृदयायनमः।ॐश्रींश्रींशिरसेस्वाहा।ॐलक्ष्मीशिखायैवषट्।ॐवासुदेवा

यकवचायहुं।ॐनमःअस्त्रायफट्।ध्यानं।विद्युच्चंद्रनिभंवपुःकमलजावैकुंठयोरेकतांप्राप्तंस्नेहवशेनरत्न
विलसद्भूषाभिरालंकृतं।विद्यापंकजदर्पणौमणिमयंकुंभंसरोजंगदांशंखंचक्रममूनिबिभ्रदमितांदिश्या
त्श्रियंवःसदा।२वामाधःकरमारभ्यविद्यादीनिलक्ष्म्याःदक्षिणाधःकरमारभ्यसरोजगदाशंखचक्राणिना
रायणस्येतिध्यात्वापूर्वोक्तपीठेदेवमावाह्यपूर्वविधिनापूजयेत्।जपांतेस्वहृदिदेवंविसर्जयेत्।चतुर्लक्षंपुरश्च
रणं।मधुत्रयाक्तैःश्वेतपद्मैःसहस्रपत्रैर्होमः।अथदधिवामनमंत्रोष्टादशाक्षरः।ॐनमोविष्णवेसुरपतयेमहा
बलायस्वाहा।अस्यमंत्रस्यइंद्रऋषिःविराट्छंदःदधिमंथनोदेवता।ॐबीजं।स्वाहाशक्तिःइष्टार्थेविनियोगः।
ॐहृदयं।नमोशिरः।विष्णवेशिखा।सुरपतयेकवचं।महाबलायनेत्रं।स्वाहाअस्त्रं।मूर्द्धलोचनाटनेत्रद्वयकर्णद्व
योष्ठतालुकंठबाहुद्वयपृष्ठहृदयोदरनाभिगुह्योरुद्वयजानुद्वयजंघाद्वयेष्वक्षरन्यासः।अथध्यानं।मुक्तागौ मंत्र॰
रंनवमणिलसद्भूषणंपद्महस्तंभृंगाकारैरलकनिकरैःशोभिवक्त्रारविंदं।हस्ताब्जाभ्यांकनककलशंशुद्धतो १०१
यातिपूर्णंदध्यन्नाढ्यंकनकचषकंधारयंतंभजामः।१।दक्षिणहस्तेदध्यन्नपूर्णरजतपात्रं।वामेहेमकलशं।।

अथध्यानानंतरं।कर्पूरधवलंदेवंनिविष्टंसरसीरुहे।सुप्रसन्नंसुनेत्रंचचारुस्मितमनोहरं।२दंडंचामृत
कुंभंचवरदंचांद्रसमप्रभं।दधिमिश्रंसोपदंशंवसुपात्रंचबिभ्रतं।चिंतयेज्जगदीशानंजगदार्तिहरंहरिं।इति
मंत्रमुक्तावल्यां।उपरितनदक्षिणवामकराभ्यांदंडकलशौअधस्तनाभ्यांदध्यन्नपात्रे।क्वचिद्देवंध्यानं।शर
च्चंद्रनिभंदेवमेवोनंविद्युज्जंस्मरेत्।पद्मासनस्थंदेवेशंचंद्रमंडलमध्यगं।२दधिमिश्रंखंडपूर्णंरौप्यपात्रेषु
दक्षिणे।वामेचामीकरमयंकलशंपूरितामृतं।३साधकायप्रयच्छंतंमहाकारुणिकंविभुं।श्रीभूमिसहितं
देवंमुक्ताभरणभूषितं।४इतिध्यात्वामानसैरुपचारैरभ्यर्च्यपूर्वोक्तपीठेदेवमावाह्यपाद्यादिभिरुपचारैःपू
जयेत्।अंगैःप्रथमावरणं।वासुदेवादिभिर्द्वितीयं।ध्वजादिभिस्तृतीयं।केशवादिभिश्चतुर्थं।लोकपालैःपंच
मं।तदस्त्रैःषष्ठं।दिग्गजैःसप्तमं।इतिपूजयित्वायथाशक्तिजपित्वाविसर्जयेत्।त्रिलक्षंपुरश्चरणं।घृताक्तैः
पायसैर्दशांशोहोमः।दध्यन्नबलिभिःधान्यहोमधनान्याप्तिः।शतपुष्पीसमुद्भवैः।बीजैःसहस्रसंख्यातैर्हो
मोनाशयतिज्वरं।२दध्योदनेनशुद्धेनकृत्वामुच्येतदुर्गतिः।स्मृत्वात्रिविक्रमंरूपंजपेन्मंत्रमनन्यधीः।मुक्तो

बंधाद्भवेन्मर्त्यो नात्र कार्या विचारणा ॥३॥ अथ हयग्रीवमंत्रः ॥ त्रयस्त्रिंशदक्षरात्मकः सारस्वतः ॥ ॐ उद्गिर
त्प्रणवोद्गीथ सर्ववागीश्वरेश्वर ॥ सर्ववेदमयाचिंत्य सर्वं बोधय बोधय ॥ अस्य मंत्रस्य ब्रह्मा ऋषिरनुष्टुप् छं
दः हयग्रीवो देवता ॥ सारस्वतादिसिद्ध्यर्थे विनियोगः ॥ ॐ हृदयं ॥ ॐ उद्गिरत्प्रणवोद्गीथ शिरः ॥ ॐ सर्ववागीश्व
रेश्वर शिखा ॥ ॐ सर्ववेदमयाचिंत्य कवचं ॥ सर्वं बोधय बोधय अस्त्रं ॥ ध्यानं ॥ शरच्छशांकप्रतिमं च वक्त्रं मुक्ता
मयैराभरणैरुपेतं ॥ रथांगशंखांकितबाहुयुग्मं जानुद्वयन्यस्तकरं नमामः ॥१॥ उपरितनकराभ्यां चक्रशंखौ
अधः कराभ्यां स्पृष्टजानुद्वयं ॥ इति ध्यात्वा नारायमंत्रोक्तपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत् ॥ हृ
त्रहृदिक्षु प्रपूजयेत् ॥ केसरेषु दिक्षु वेदादींश्चतुरः ॥ विदिक्षु अंगस्मृतिन्यायशास्त्राणि पूजयेत् ॥ अंगा
न्निवबहिर्लोकपालान्तद्बहिः तदस्त्राणि पूजयेत् जपित्वा विसर्जयेत् ॥ वर्णलक्षं पुरश्चरणं ॥ कुंदकुसुमै
र्दशांशो होमः ॥ श्रीकरः परिगीयते ॥ कुंदपुष्पाणि जुहुयात् दिव्यं वाक्श्रियमव्ययां ॥ मन्त्रमानेन संजप्तं
तैलं ब्राह्म्यरसेन संस्कृतं ॥ कवितामावहेत्पुंसां मनिर्गलविवर्जितां ॥ वचामानेन संजप्तो मंत्रयेत्प्रातरत्वरं ॥ सर्ववि मंत्र० १०२

वागमादीनां व्याख्याने जायते चिरात् ॥३॥ एकविंदेवं मंत्रः ॥ उद्गीथप्रणवोद्गीथ सर्ववागीश्वरेश्वर ॥ सर्ववेदमया
नंद सर्वं बोधय बोधय ॥ अन्यत् पूर्ववत् ॥ अथानुष्टुप् हयग्रीवमंत्रः ॥ ऋग्यजुःसामरूपाय वेदाहरणकर्मणे ॥
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः ॥ अस्य मंत्रस्य ब्रह्मा ऋषिरनुष्टुप् छंदः हयग्रीवो देवता हकारो बीजं ॥ सका
रः शक्तिः इष्टार्थे विनियोगः ॥ ऋग्यजुःसामरूपाय हृदयं ॥ वेदाहरणकर्मणे शिरः ॥ प्रणवोद्गीथवपुषे शिखा ॥ म
हाश्वशिरसे कवचं ॥ नमः नेत्रत्रयं ॥ समस्तेनास्त्रं ॥ ध्यानपूजादि पूर्ववत् ॥ अथापरो हयग्रीवमंत्र एकाक्षरः ॥ ह्स्रूं ॥
अस्य मंत्रस्य ईश्वर ऋषिः गायत्री छंदः ॥ हयग्रीवो देवता ॥ हं बीजं ॥ सः शक्तिः इष्टार्थे विनियोगः ॥ ह्स्रां ह्स्रीं इत्यादि
षडंगं ध्यानं ॥ हयग्रीवं महाबाहुं शारदांबुरुदप्रभं ॥ शंखादि पुस्तकज्ञानमुद्रां बिभ्राणमच्युतं ॥१॥ दक्षिणो
र्ध्वकरमारभ्य शंखादि ज्ञेयं ॥ पूजादिकं पूर्ववत् ॥ ॥ अथ राममंत्राः ॥ तत्र षडक्षरः ॥ रां रामाय नमः ॥ रां श्रीरा
माय नमः सप्ताक्षरः ॥ श्रीं रां रामाय नमः ॥ ॐ रां रामाय नमः ॥ अपरः ॥ ॐ श्रीं रां रामाय नमः ॥ अष्टाक्षरः ॥ रां श्रीं क्लीं रामा
य नमः ॥ अन्यः ॥ ॐ रां श्रीं क्लीं रामाय नमः ॥ अन्यः ॥ बहुप्रकाराः ॥ अस्य राममंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः श्रीरामो

देवताऽभीष्टार्थे विनियोगः॥ रांरींरूंरैंरौंरः इत्यादि षडंगं॥ ब्रह्मरंध्रे भ्रुवोर्मध्ये हृन्नाभ्यंगुह्यपादयोः॥ षडक्षराणि
मंत्रस्य विन्यसेन्मनुवित्तमः॥२॥ अथ ध्यानं॥ कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं
दधानमपरं हस्तांबुजं जानुनि॥ सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यंतीं मुकुटांगदादि
विविधाकल्पोज्ज्वलांगं भजे॥२॥ दक्षिणे ज्ञानमुद्रा॥ वामजान्वासक्तं वामकरं हृदि ध्यात्वा नारायणो रूपी वै
देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्॥ श्रीं सीतायै नमः इति पार्श्वगतां सीतां पूजयेत्॥ शार्ङ्गाय नमः॥ शरे
भ्यो नमः इति पार्श्वद्वयोस्तेषां गानि॥ तद्बहिः पूर्वादिपत्रेषु हनुमते नमः॥ सुग्रीवाय भरताय विभीषणाय लक्ष्म य
णाय अंगदाय शत्रुघ्नाय जांबवते नमः इति पूजयेत्॥ वाचयंतं हनूमंतं अग्रे वक्ष्यत पुस्तकं॥ यजेद्भरतशत्रुघ्नौ
पार्श्वयोर्धृतचामरौ॥२॥ धृतातपत्रं हस्ताभ्यां पश्चिमे यजेत्॥ तेष्वेव दलेषु सृष्टाय जयंताय॥ विजयाय॥ स्वराष्ट्रा मंत्र·
य॥ राष्ट्रवर्धनाय॥ अकोपाय॥ धर्मपालाय॥ सुमंत्राय नमः इति पूजयेत्॥ लोकपालांस्तदस्त्राणि तद्बहिः इति पू १०३
जयित्वा यथाशक्ति जपित्वा देवं विसर्जयेत्॥ षट्लक्षं पुरश्चरणं॥ कमलैर्दशांशो होमः॥ एवं पूजादिभिः सि

द्धमंत्री कर्माणि साधयेत्॥ जातीप्रसूनैर्जुहुयाच्चंदनांभः समुक्षितैः॥१॥ राजवश्याय कमलैर्धनधान्यादिसंप
दे॥ नीलोत्पलानां होमेन वश्यायेदखिलं जगत्॥२॥ बिल्वप्रसूनैर्जुहुयादिंदिराप्राप्तये नरः॥ दूर्वाहोमेन दीर्घायु
र्भवेन्मंत्री निरामयः॥३॥ रक्तोत्पलकृतो मंत्री धनमाप्नोति वांछितं॥ मेधाकामेन होतव्यं पालाशकुसुमेन वै॥ ध
त्तूरकुसुमं नश्यपिबेत्कविर्भवति वत्सरात्॥ तन्मंत्रिताज्यं भुंजीत महदारोग्यमाप्नुयात्॥५॥ अथ राममंत्रांतरं ष
ट्त्रिंशदक्षरं॥ ॐ नमो भगवते रघुनंदनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनाय अमिततेजसे बलाय रा
माय विष्णवे नमः॥६॥ स्वाहांतः क्वचित्॥ विश्वामित्र ऋषिः गायत्री छंदः श्रीरामो देवता॥ प्रणवो बीजं॥ स्वाहा शक्तिः
ऐं क्रां ऐं क्रीं ऐं क्रूं ऐं क्रैं ऐं क्रौं ऐं क्रः इत्यादि षडंगं॥ ध्यानपूजादिकं पूर्ववत्॥ अथाष्टादशाक्षरः॥ ॐ नमो भगवते
रामाय महापुरुषाय नमः॥ अस्य विश्वामित्र ऋषिः धृतिः छंदः॥ श्रीरामो देवता॥ पदैः षडंगं॥ अन्यत्पूर्ववत्॥
अथ राममंत्रांतरो रामस्यैव त्रयोदशाक्षरः॥ ॐ क्रों क्रीं श्रीं भरताग्रजाय स्वाहा॥ अस्यापि ऋष्यादिकं पूर्ववि
त्॥ ॐ बीजं॥ क्रों शक्तिः॥ ॐ क्रीं हृदयं॥ श्रीं शिरः॥ भरताग्रजाय स्वाहा शिखा॥ क्रीं कवचं॥ स्वाहा अस्त्रं॥ ध्यानपूजा

दिकं पूर्ववत्॥ अथापरो मंत्र एकोनविंशाक्षरः॥ ॐ नमः सीतापतये रामाय दहन दहन हुं फट् स्वाहा॥ अस्यापि ऋ-
षिदेवते पूर्वोक्ते॥ बृहती छंदः॥ ॐ बीजं॥ नमः शक्तिः॥ ॐ नमो हृदयं॥ सीतापतये शिरः॥ रामाय शिखा॥ दहन दहन कव-
चं॥ हुं फट् स्वाहा अस्त्रं॥ पूजादिकं पूर्ववत्॥ अथ मंत्रांतरं अनुष्टुप्॥ ॐ रां श्रीरामचंद्र महेष्वास रघुवीर नृपोत्तम॥
दशास्यांतक मां रक्ष देहि देहि परमे श्रियं॥ अस्य मंत्रस्यानुष्टुप् छंदः॥ अस्यानुष्टुप् मंत्रस्य ऋषिदेवते पूर्वोक्ते॥ रां
बीजं॥ श्रीं शक्तिः॥ ॐ रां श्रीरामचंद्र महेष्वास हृदयं॥ रघुवीर नृपोत्तम शिरः॥ दशास्यांतक मां रक्ष शिखा॥ देहि द-
परमे श्रियं कवचं॥ मम स्तेनास्त्रं॥ ध्यान पूजादिकं पूर्वोक्तं॥ अथ मंत्रांतरं॥ रां श्रीं जानकीवल्लभाय स्वाहा॥ अ-
स्यापि ऋष्यादिकं पूर्वोक्तं॥ विराट् छंदः॥ रां रीं इत्यादि षडंगानि॥ ध्यान पूजादिकं पूर्वोक्तं॥ अथ मंत्रांतरं एका-
दशाक्षरः॥ ॐ क्लीं श्रीं श्रीं दाशरथये नमः॥ २ ॐ श्रीं त्रैलोक्यनाथाय नमः॥ ३ ॐ श्रीं सीतावल्लभाय नमः॥ ४ ॐ क्लीं मंत्र
दशाननविनाशनाय नमः॥ ५ ॐ क्लीं श्रीं आंजनेयगुरवे नमः॥ ऋष्यादिकमेतेषां पंचानां पूर्वोक्तं॥ अथ सी- १०५
तामंत्रः षडक्षरः॥ श्रीं सीतायै नमः॥ अस्य मंत्रस्य वाल्मीकि ऋषिः॥ गायत्री छंदः॥ श्रीसीता देवता॥ इष्टार्थे विनि-

योगः॥ अथ रामगायत्री॥ दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात्॥ ॥ अथ सुद-
र्शनमंत्रः सप्ताक्षरः॥ ॐ सहस्रार हुं फट्॥ अस्य मंत्रस्य अहिर्बुध्न्य ऋषिरनुष्टुप् छंदः॥ सुदर्शन महाविष्णु-
र्देवता॥ स्रों बीजं॥ हुं शक्तिः॥ इष्टार्थे विनियोगः॥ आचक्राय स्वाहा॥ अंगुष्ठाभ्यां नमः॥ विचक्राय स्वाहा॥ तर्ज-
नीभ्यां नमः॥ सुचक्राय स्वाहा॥ मध्यमाभ्यां नमः॥ श्रीचक्राय स्वाहा॥ अनामिकाभ्यां नमः॥ संचक्राय स्वाहा॥ क-
निष्ठिकाभ्यां नमः॥ ज्वालाचक्राय स्वाहा॥ करतलपृष्ठाभ्यां नमः॥ इति करशुद्धिः॥ आचक्राय स्वाहा॥ हृदयाय न-
मः॥ इत्येतैर्मंत्रैः षडंगानि कुर्यात्॥ ततो दिग्बंधनं॥ अर्कमात्राशरीरिणे॥ निःसृतशरीराय स्वाहा॥ ऐंद्रीं दिशं
चक्रेण बध्नामि नमश्चक्राय स्वाहा॥ एवमाग्नेयीं दिशं याम्यां नैरृतीं वारुणीं कौबेरीं वायवीं ईशानीं ब्राह्मीं
अधो वैष्णवीं दिशं चक्रेण बध्नामि नमश्चक्राय स्वाहा॥ इत्यनेन प्रकारेण दिग्बंधनं कुर्यात्॥ स्वपरितः प्राका-
रो ध्यातव्यः॥ ततः प्रणवं श्वेतं लोहितं शुक्लवर्णं शिरसि विन्यसेत्॥ अन्यान् लोहितवर्णान् मुखवदनहृ-
दयगुह्यजानुपादसंधिषु न्यसेत्॥ अथ ध्यानं॥ उद्यद्भास्करसप्रभा निखिलान्यानि दिशो भासयन्ती

श्री

मारव्यः स्फुरदर्धहासविकसद्दंष्ट्राप्रदीप्तानन ॥ दोर्भिश्चक्रदरौ गदाजमुशाल शासांश्यपाशांकुशौ बि-
भ्रत्पिंग शिरोरुहात्मवनवतश्चक्राभिधानो हरिः ॥ २ उपरितनवामकरात् गदाकमले । तदधः मुशलतर्ज-
नीदर्शने । तदधः पाशांकुशौ ध्येयौ । इति ध्यात्वा नारायणोक्त पीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत् ।
अंगैः प्रथमावरणं । चक्राय शंखाय गदायै पद्माय मुशलाय धनुषे पाशाय अंकुशाय नमः इति पूजयेत् । लक्ष्म्यै
सरस्वत्यै रत्यै प्रीत्यै कीर्त्यै कांत्यै तुष्ट्यै नमः इति पत्रेषु इंद्रादीन्सदायुधान्निवपूजयेत् । सुदर्शनाय विद्महे
महाज्वालाय धीमहि । तन्नश्चक्रं प्रचोदयात् । एषा सुदर्शनगायत्री विषुसांनिग्रहकारिणी । ॐ नमो भगवते म-
हासुदर्शनाय ॐ फट् इति । सुदर्शनस्य षोडशाक्षरोयं मंत्रोपयोगी । ॐ नमो भगवते महासुदर्शनाय महाच-
क्राय महाज्वालाय दीप्ताय सर्वतो रक्ष रक्ष मां महाबलाय स्वाहा । अयं महासुदर्शनमंत्रः । प्रयोगादिकं मंत्र २०५
मस्य स्वरूपाकरः । द्वादशाक्षरं पुरश्चरणं । द्वादशसहस्रं तिलसर्षपान्यां बिल्वात्तकमिद्भिर्वा होमः । प्र-
लयाग्निसमं चक्रं यस्य स्वरूपानि चिंतयेत् । स साहाय्य ज्वरमूर्छाज्वरो मंडलान्मतिमेति सः । २ शिरश्चक्रनिभं सार्ष

स्वधाधारान्निधर्षणं । स्मरेन्मूर्द्धनि यस्यास्य स नवेद्विगतामयः ॥ ३ पंचगव्यं जपेत्स्पृष्ट्वा दशाष्टशतावधि ।
न्यसेत्तत्पत्रपत्रादौ पात्रेवा ब्रह्मचर्जने । ३ फलेबिल्वस्य वा मंत्री गृहे स्वस्य परस्य वा ॥ निखनेत्सर्वरक्षास्यादर्द्धं-
तेमर्वमंपदः ॥ ४ ॥ अथ हृषीकेशमंत्राः । स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च । रक्षांसि भीतानि
दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ॥ १ अस्यार्जुन ऋषिः त्रिष्टुप् छंदः । विश्वरूप विष्णुर्देवता सुदर्शनं
मंत्रो बीजं नारायणास्त्रं रक्षा क्रिं इष्टार्थे विनियोगः । अयं मंत्रः सुदर्शनजपविशेषे यंत्रे चोपयुज्यते । सुतं-
त्रश्च । वक्ष्यमाणमंत्रवदस्यापि पूजा । अथाष्टाक्षरो हृषीकेशमंत्रः । क्लीं हृषीकेशाय नमः । अस्य नलकूँड ।
ऋषिः संमोहनो वा अनुष्टुप् छंदः । हृषीकेशो देवता इष्टार्थे विनियोगः । क्लां हृदयाय । क्लीं शिरः । क्लूं शिखा । क्लैं
कवचं । क्लौं नेत्रत्रयं । क्लः अस्त्रं । शंखचक्रगदापद्मधरं तुलकवर्णं गरुडोपरि संस्थितं ध्यायेत् । पूर्वोक्त पीठे
देवमावाह्य पूजयेत् । अंगैः प्रथमावरणं । ॐ श्रीवत्साय । कौस्तुभाय नमः इति दक्षिणोत्तरयोः स्तनयोः पूज-
येत् । ॐ वनमालायै नमः । इति ग्रीवायां । ॐ मुकुंदाय नमः इति मूर्ध्नि । पक्षिराजाय नमः इति गरुडोपरि पंक-

जनार्दनायनम इतिकर्णिकायां।इतिस्नापयित्वापूजयेत्।ततः ॐनमोनमः।ॐपुरुषोत्तमायनमः।ॐलक्ष्मीनि
वासायनमः।ॐसकलजगन्नाथाय।ॐजगत्त्राणायनमः।सर्वस्त्रीहृदयायत्रिभुवनोन्मादकायसर्ववशी
करणायसर्वकामप्रदायॐफट्नमः।इत्येतैर्मंत्रैःपुष्पैरभ्यर्च्यसिममन्त्रमूलेनाभ्यर्च्य।ॐश्रंश्रियेनमःइ
त्युत्संगगतांदेवींपूजयेत्।इतिपूजयित्वादेवंविसृज्यविष्णुपरिषद्भ्योनमः।विश्वक्सेनायनमइतिपूजये
त।अष्टलक्षंपुरश्चरणं।कमलैर्दशांशतोहोमः।अथश्रीधरमंत्रःपंचदशाक्षरः।श्रींक्लींश्रींश्रींश्रीधरत्रैलोक्य
मोहनायनमः।अस्यमंत्रस्यसर्वंपूर्ववत्।अथश्रीकरमंत्रोष्टाक्षरः।ॐतिष्ठश्रीकरस्वाहा।श्रीकरमंत्रस्यवा
मदेवऋषिःपंक्तिश्छंदःश्रीकरोविष्णुर्देवता।ॐबीजंस्वाहाशक्तिःश्रीप्राप्तयेविनियोगः।शोषयशोषयॐहृ
दयायनमः।त्रासयत्रासयॐशिरसेस्वाहा।प्रमर्दयप्रमर्दयकवचायहुं।प्रस्फुरप्रस्फुरॐअस्त्रायफट्।इतिपंचां मंत्र·
गन्यासंविधायमूर्द्धादिकंवक्त्रहृदयोदरोरुजानुपादद्वयेषुअक्षरन्यासंकुर्यात्।ॐब्राह्मणेभ्योनमःमुखे।क्ष २०६
त्रियेभ्योनमःबाह्वोः।ॐवैश्येभ्योनमःऊर्वोः।श्रींशूद्रेभ्योनमःपादयोः।कंचक्रायनमःदक्षिणोर्ध्वकरे।रंशंखायन

मःवामोर्ध्वकरे।खंगदायैनमःदक्षिणाधःकरे।ॐह्रांपाशायनमइतिवामाधःकरे।केषांचिन्मते।ॐब्राह्मणो
स्यमुखमासीदितिमुखे।त्रिबाहूराजन्यकृतबाहुयुगले।ॐऊरूतदस्ययद्वैश्यइत्यूरुद्वये।श्रीपद्भ्यांशूद्रोऽ
जायतइतिपादद्वयेनन्यसेदिति।ब्राह्मणविषये।ततोध्यानं।दुग्धाब्धिद्वीपपर्यन्तविलसत्सुखोद्यानकल्पद्रु
माधोन्नजांभोजपीठोपरिगतविनतानंदनस्कंधसंस्थः।दोर्भिर्बिभ्रद्रथांगंसदरमथगदापंकजस्वर्णवर्णैः
नास्वन्मूलेर्विचित्राभरणगणितगतःस्यात्श्रियेवासुदेवः।दक्षिणोर्ध्वकरमारभ्यचक्रादीनिइतिध्यात्वा
मानसिकपूजानंतरंनारायणमंत्रोक्तपीठेदेवमावाह्यपाद्यादिभिःपूजयेत्।अंगैःप्रथमावरणं।श्रियैरत्यै।
धृत्यै।कांत्यैनमःइतिपूर्वादिपत्रेषुपूजयेत्।वासुदेवायसंकर्षणायप्रद्युम्नायअनिरुद्धायइतिकोणप
त्रेषु।शंखनिधयेनमः।पद्मनिधयेनमइतिपार्श्वद्वये।विश्वक्सेनायनमः।इतिअग्रतः।ईशकोणेलोकपाला
न्स्वदिक्षुइतिपूजयित्वायथाचा।क्रिजपित्वादेवंविसर्जयेत्।अष्टलक्षंपुरश्चरणं।प्रणवमन्मथश्री
बीजैःसंपुटितेनमःच्चीघ्रफन्दोनवति।श्रीहृत्समिद्भिर्दशांशतोहोमः।आज्यसिक्तैःसरसिजैर्जुहुया

इत्युत्तरं। निवसेत्कमलातस्मिन्न्यजेत्सुतानपि॥ बिल्ववृक्षसमीपो मासान्ह्याद्धनपतिर्भवेत्। जलां-
जलिं निरात्मानमभिषिंचेद्दिने दिने॥ स्नानकालेषु सततं वेष्टो नाम्य श्रीसमृद्धिमान्॥ अथ शरणागतमंत्रः पं-
चविंशाक्षरः। श्रीमन्नारायणचरणौ शरणं प्रपद्ये श्रीमते नारायणाय नमः॥ अस्यापि ऋष्यादिकं पूर्ववत्। क्लां
क्लीं इत्यादि षडंगं। ध्यानं। चक्रादिधारणं पूर्ववत्। चरणयोरधः साधकममृतहस्तापत्रपंतं ध्यात्वा पूर्ववत्पी-
ठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्॥ अथ महावराहमंत्रः। त्रयस्त्रिंशदक्षरः। ॐ नमो भगवते वारा-
हरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि ददापय स्वाहा। अस्य वाराहमंत्रस्य भार्गव ऋषिः अनुष्टुप्छंदः श्री-
वराहरूपी विष्णुर्देवता। ॐ बीजं स्वाहा शक्तिः। ग्लं बीजमिति क्वचित्। भूपतित्वादिसिद्धये विनियोगः। अण-
वो भुवनेश्वरी शर्वकोजप्यः। एकशृंगाय नमः हृदयाय नमः। सोमकाय नमः शिरसे स्वाहा। तेजोधिपतये न- मंत्र°
मः शिखायै वषट्। विश्वरूपाय नमः कवचाय हुं। महादंष्ट्राय नमः अस्त्राय फट्। अथवा। ॐ नमो भगवते हृ- २०७
दयं। वाराहरूपाय शिरः। भूर्भुवःस्वःपतये शिखा। भूपतित्वं मे कवचं। देहि ददापय स्वाहा अस्त्रं। एवं पंचांगं

विधाय ध्यानं कुर्यात्। जान्वोरापादमुद्यत्कनकमिव प्रख्यमाजानुनाभेः कंठादानाभि वह्निप्रथमथ शि-
रसुधोल्कामिरं श्रुं वराहं। दक्षिणवामकरयोश्चक्रशंखौ। तदधः असिखेटौ। तदधो गदाशक्ती। तदधो
वराभये ध्येये। एवं ध्यात्वा मानसिकपूजां विधाय नारायणमंत्रोक्तपीठे अष्टदलकमलकर्णिकायां दे-
वमावाह्याद्यादिभिरुपचारैः पूजयेत्। चतुर्दिक्षु चत्वारि अंगानि। कोणेषु कोर्द्धमधश्चास्त्रं पूजयेत्। पत्रेषु च-
श्रीवराय क्राय शंखाय सखेटाय गदायै शक्त्यै वराहाय अभयाय नमः इति पूजयेत्। तद्बहिर्लोकपालान् तद्बहिस्तद-
स्त्राणि च पूजयेत्। दंष्ट्रायां च सुधायै नमः। ऊंञ्जतौ वागीशायै नमः। निःश्वसिते अनिलाय नमः। दक्षिण-
बाहौ रवये नमः। वामबाहौ शशिने नमः। कुक्षौ वसुभ्यो नमः। दृशोरश्विभ्यां नमः। पादयोः पद्मभुवे नमः। हृ-
दये हराय नमः। मुखे चांकराय नमः इति प्रत्यंगं पूजयेत्। एवं संपूज्य देवं सुदृष्टिं स्थापयेत्। लक्षं पुरश्चरणं। क-
मलैर्मधुरत्रयाक्तैर्दशांशो होमः। ध्यानाद्देवो धनं दद्यात् जपात् दद्याद्वसुंधरां। प्रयच्छेत् जपसंजात्म्यां धनधा-
न्यसमृद्धितः। हरनोसिंहगतेष ध्यां भुक्तपक्षाभितौ त्रिचां। पंचगव्येषु संक्षिप्य स्पष्टं हुतो मधुतं जपेत्। उत्त-

रानिमुखोऽत्र चात्वा तां शिलां निखनेद्भुवि। रात्रौ चौरमहानूतैः कृतां बाधां विनाशयेत्। अनान्तर्दये नोमवारे सा
ध्यक्षेत्रात् समाहरेत्। मृत्तिकां संजपन्मंत्रं तां पुनर्विनजे त्रिधा। धत्तुल्यात्मकं समालिप्य पाकपात्रं ततः परं। गोदु
ग्धेन समालोड्य शोधितांस्तंडुलान् क्षिपेत्। पसंस्कृतेऽग्नौ पचेत् सम्यक् चरुं मंत्री जपन्मनुं। अवतार्य चरुं पश्चा
दग्नौ देयं यथाविधि। धूपदीपादिकैरिष्ट्वा पुनरालोड्य तं चरुं। जुहुयाद्दं वितेव कौ यावदष्टोत्तरं शतं। ७।
एवं सप्तारवारेषु जुहुयात् क्षेत्रसिद्धये। प्रातःकाले नृगो वारि घृष्टं साध्यमहीतलात्। आदाय हविरापाद्य
पूर्ववत् जुहुयात् सुधीः। विरोधो न नृपतिः क्षेत्रे सदचौराद्युपद्रवैः। ॥ अथ वाराहोपासकोपयोगी धरणीमं
त्राणः को न विज्ञात्यक्षरः। ॐ नमो भगवत्यै धरिण्यै धरणिधरे धरे स्वाहा। अस्य मंत्रस्य ब्रह्मा ऋषिः वाराहो वानुष्टु
छंदः धरण्यात्मिका देवता। ॐ बीजं। स्वाहा शक्तिः। कीलकं। धरणीशाम्यये विनियोगः। ॐ नमो हृदयं। भगव
त्यै शिरः। धरण्यै शिखा। धरणिधरे कवचं। धरे नेत्रत्रयं। स्वाहा अस्त्रं। ध्यानं। रूपां मो विचित्रां शुकरत्नवर्णां
पद्मासनां तुंगपयोधरानतां। इंदीवरे देन वज्रा लिमंजरीं शुकं दधानां वसुधां नमामहे। श्व उपरितन कर मंत्र॰ १०८

द्वयेन नीलोत्पलद्वयं। दक्षिणे शुकं। वामे शालिमंजरीं। एवं ध्यात्वा वैष्णवीपीठे देवीमावाह्य पाद्यादिभिः पू
जयेत्। लोकपालांश्च स्वदिक्षु। अंगैः प्रथमावरणं। ध्रुवे। वक्रये। जलाय। मरुत्यै नमः इति दिक्पत्रेषु
कोणेषु निवृत्तिविद्याप्रतिष्ठाशांतीः पूजयेत्। लक्षं पुरश्चरणं। समपिष्टपायसेन दशांशो होमः। प्रयो
गादिकं वाराहोक्तं। अथैकाक्षरो वाराहमंत्रः। हुं। अस्य ऋष्यादिकं मालामंत्रवत्। क्रां क्रीं इत्यादि पंचांगं।
अथ गोपालमंत्राः। तत्राष्टादशाक्षरः। क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा। अस्य गोपा
लमंत्रस्य नारद ऋषिः। देवी गायत्री छंदः। गोपालो देवता। क्लीं बीजं। स्वाहा शक्तिः। इष्टार्थे विनियोगः। क्लीं
कृष्णाय हृदयाय नमः। गोविंदाय शिरसे स्वाहा। गोपीजन शिखायै वषट्। वल्लभाय कवचाय हुं। स्वा
हा अस्त्राय फट्। ध्यानं। अव्यान्मीलत्कलापप्रकृतिरहिरिपुपिच्छलक्ष्मसत्केशजालो गोपीनेत्रोत्पलारा
धितललितवपुर्गोपगोवृंदवीनः। श्रीमद्वक्त्रारविंदप्रतिहसितशशांकाकृतिः पीतवासा देवो सो वे
णुवाद्यक्षपितजनधृतिर्देवकीनंदनो वः। इति मानसिकपूजां विधाय नारायणमंत्रोक्तपीठके णि

कार्यादेवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्। अंगैः प्रथमावरणं पत्रेषु। कालिंद्यै। नाग्निजित्यै। मित्रवि
दायै। चारुहासिन्यै। रोहिण्यै। जांबवत्यै। रुक्मिण्यै। सत्यनामायै नमः इति पूजयेत्। एताः पीतांबराः करधृ
तकमलाः ध्येयाः। तद्बहिः ऐरावताय। पुंडरीकाय। वामनाय। कुमुदाय। अंजनाय। पुष्पदंताय। सार्वभौमा
य। सुप्रतीकाय नमः इति पूजयेत्। लोकपालांश्च स्वदिक्षु तदस्त्राणि बहिः। एवं पूजयित्वा यथाशक्ति जपि
त्वा स्वहृदि देवमुद्वासयेत्। लक्षं पुरश्चरणं। अयुतद्वयं वा। अरुणकमलैर्दशांशो होमः। शिखिवेत्रधरं वि
ष्णुं किंकिणीजालमंडितं। स्मृत्वा संतर्पयन्मंत्री दुग्धबुध्या स्तुर्जनैर्जलैः। धनधान्यांशुकादीनि प्रीतस्तस्मै
ददाति सः। अथ दशाक्षरः। गोपीजनवल्लभाय स्वाहा। तारमायश्रीमन्मथबीजपुटितोयं दशाक्षरः। अस्य
ऋष्यादिकं पूर्ववत्। मंत्रप्रकाराः। क्लीं गोपीजनवल्लभाय। क्लीं गोपीजनवल्लभाय स्वाहा। ४। श्रीं क्लीं गो मंत्र॰
पीजनवल्लभाय स्वाहा क्लीं श्रीं। ५। क्लीं श्रीं क्लीं गोपीजनवल्लभाय स्वाहा क्लीं क्लीं। ६। ॐ क्लीं गोपीजनवल्लभा २०९
य स्वाहा क्लीं ॐ। ७। श्रीं क्लीं क्लीं गोपीजनवल्लभाय स्वाहा क्लीं क्लीं श्रीं। ८। ॐ क्लीं श्रीं क्लीं गोपीजनवल्लभाय स्वा।

हा। क्लीं क्लीं श्रीं ॐ। ९। अस्य गोपालमंत्रस्य नारद ऋषिः। विराट् छंदः। श्रीगोपालो देवता। ककारस्थितत्रा का
रो वै बीजं। स्वाहा शक्तिः। क्लीं बीजं। लं कीलकं। क्लों आचक्राय नमः हृदयाय नमः। क्लीं विचक्राय स्वाहा शि
रसे स्वाहा। क्लूं सुचक्राय स्वाहा शिखायै वषट्। क्लैं त्रैलोक्यरक्षणाय चक्राय स्वाहा कवचाय हुं। क्लौं असु
रांतकचक्राय स्वाहा अस्त्राय फट्। इति पंचांगानि। षडंगपक्षे तु। क्लौं असुरांतकाय चक्राय स्वाहा नेत्रत्रया
य वौषट्। क्लः सुदर्शनाय चक्राय स्वाहा अस्त्राय फट्। हृन्नाभिकटिगुह्यपादमूर्द्धमुखघ्राणचक्षुःश्रोत्रे
ष्वक्षरन्यासः। अथ ध्यानं भीलकलापः इति अष्टादशाक्षरमंत्रवत् ध्यानं। इदं निसध्यानं। दशाष्टादशाक्षरयोः
काम्यध्यानं तयोर्द्वयोरपीदं। अथ त्रिकालध्यानं। ------
दानंदनवमणिविलसत्किंकिणीजालनद्धश्री
णीजंघानुसुगुंफं त्रिपुररुरुनखप्रोल्लसत्कल्पवृक्षं।
नक्रंदत्तत्राकुरूपतत्सूतनाद्यं प्रसन्नं गोवि
दं वंदितं त्र्याद्यमरवरमजं पूजयेद्वासरादौ। २। वंदे
विकसितमरविंदानमिंदीवराक्षं गोगोपपाहृद्दवी
तं जितरिपुनिवहं कुंदमंदारहासं। नीलग्रीवाग्र
नसुविलसत्कुंडलं भानुमंतं देवं पीतांबराद्यं यज

उच्चदिनक्षोमध्यमेक्रोरमायै।२ वाक्कांताध्वस्त ———— ममितमपावनीनारमाद्यैरावीतंनारदाद्यैर्मुनिभि
रभिष्टुतंतत्त्वनिर्णीतहेतोः।मायाक्रेनिर्मलंतंनिरूपममजरंचिंतयेन्नीलनामंमंत्रीक्लिबोदयस्थित्यपल्ल
यहरणंमुक्तिदंवासुदेवं।३ त्रिकालेप्येवंपरिंसध्याडिंणंध्यायेत।मनुजोयंमहामनाःसधर्मसुखं
श्रेयःपरमवाप्यदेहांतेमुक्तिमाप्नुयात।इतित्रिकालपूजाध्यानं।ततोमानसैरुपचारैरभ्यर्च्यविष्णवपीठे
देवमावाह्यपाद्यादिभिरुपचारैःपूजयेत।अंगैःप्रथमावरणं।वासुदेवाय।संकर्षणाय।प्रद्युम्नाय।अ
निरुद्धायनमइतिचतुर्दिक्षु।शांत्यै।श्रियै।धृत्यै।सरस्वत्यैनमइतिकोणेषुपूजयेत।रुक्मिण्यै।सत्यभामा
यै।नाग्निजित्यै।सुनंदायै।मित्रविंदायै।जांबवत्यै।सुशीलायै।लक्ष्मणायैनमइतिपत्रेषु।रामायैबलभ
द्राय।सुभद्रायै।वसुदेवाय।देवक्यै।नंदगोपाय।यशोदायै।श्रीदामायनमइतिपत्रेषु।ऐरावताय।कु मंत्र·
मुदाय।पुंडरीकाय।वामनाय।शंकुकर्णाय।सर्वनेत्राय।सुमुखाय।पिंगलायनमइतितेष्वेव।दशसे ११०
नाभ्यःनमइत्यग्रे।लोकपालांश्चस्वदिक्षु।लक्षंपुरश्चरणं।अयुतद्वयंवा।अरुणकमलैर्दशांशोहोमः।

शिखिवेत्रधरंविष्णुंकिंकिणीजालमंडितं।स्मृत्वासंतर्पयेन्मंत्रीदुग्धबुध्यास्तुनैर्जलैः।४ धनधान्यांशु
कादीनिदीतस्त्रस्मैरदातिसः।काममंसुदितोद्वेषमोहयेदखिलंजगत।५ सर्वभोगप्रद ————
पितथैष्यते।विद्यांचेवत्रयच्छेतमाययासंस्फुटीकृते।६ श्रीबीजवेष्टनाल्लक्ष्मीःसर्वभोगास्तथैवच।—
———— तादस्माद्धर्ममोक्षौलभेन्नरः।अथमंत्रांतरंमंत्रोभुक्तिमुक्तिप्रदायकः।अथाष्टादशाक्षरगो
पालमंत्रः।क्लींक्लींश्रीगोपीजनवल्लभायस्वाहा।अस्यमंत्रस्यनारदऋषिः।विराटछंदः।श्रीगोपालोदेव
ताइष्टार्थेविनियोगः।दशार्णवद्ध्यानपूजादिकंकार्यं।पंचलक्षंपुरश्चरणं।अरुणकमलैर्दशांशोहोमः
पूजामेऽप्यस्यप्रथमद्वारे।धात्रे।विधात्रे।द्वारश्रियै।वसुपुष्पाय।इतरद्वारेषु।चंडाय।प्रचंडाय।भद्राय।सु
भद्राय।बलाय।विजयायइत्यादयः।अथास्यतंत्रयंत्रोपयुक्ताश्चमंत्रालिख्यंते।क्लींइत्येकाक्षरः।क्लींकृ
ष्णाय।२ क्लींकृष्णायस्वाहा।३ क्लींकृष्णायगोविंदायस्वाहा।४ ॐनमःकृष्णायदेवकीपुत्रायहुंफटस्वा
हा।५ सौंक्लींनमोभगवतेनंदपुत्रायबलायवपुषेश्यामलायगोपीजनवल्लभायस्वाहा।क्लींसौं।६ एते

षां सर्वेषां ऋषिश्छंदो देवता ध्यानादिकं च दशाक्षरगोपालमंत्रवत्॥ अथ पुत्रदो गोपालमंत्रः सप्तविंशत्यक्ष
रः॥ देवकीनंदनं नंदनाय स्वाहा नंदिने नंदनप्रदाय नंदनंदनं मे देहि देव स्वाहा॥ अस्य मंत्रस्य नारद ऋषिर्गाय
त्री छंदः पुत्रदो गोपालो देवता पुत्रप्राप्तये विनियोगः॥ अन्यत् पूर्ववत्॥ अथ लीलागोपालमंत्रः॥ ऊन
त्रिंशदक्षरात्मकः॥ लीलादंडगोपीजनसंसक्तदोर्दंड बालरूपमेघश्याम भगवन् विष्णो स्वाहा॥ अ
स्य नारद ऋषिरनुष्टुप् छंदः लीलादरिर्देवता इष्टार्थे विनियोगः॥ लीलादंड हृदयं॥ गोपीजनसंस
क्तदोर्दंड शिरः॥ बालरूप शिखा॥ मेघश्याम कवचं॥ भगवन् विष्णो नेत्रं॥ स्वाहास्त्रं॥ केषांचिन्मते च
तुर्थ्यंतैश्चतुः पंचवर्णैरक्षरैः पंचांगं॥ ध्यानं॥ संमोदयन्निजकवामकरस्थलीलादंडेन गोपयुवतीः सु
रसुंदरीश्च॥ दिश्यान्निजप्रियतमा सगदाऽक्षदंडो देवः श्रियं निहतकंसउरुक्रमो वः॥१॥ इति ध्यात्वा मंत्र
मानसैरुपचारैरभ्यर्च्य देवमावाह्य प्रजयेत्॥ अन्यत् पूर्ववत्॥ दिक्पालान् तदस्त्राणि च पूजयेत्॥ ल ११२
क्षं पुरश्चरणं॥ मध्वक्तैस्तिलतंदुलैर्दशांशो होमः॥ लीलादंडहरिं यो वै भजते नित्यमादरात्॥ सगृहते

मर्त्यलोके स्वं नजेदि दिरामदा॥ अथ शरणागतगोपालमंत्रो द्वादशाक्षरः॥ श्रीमन्मुकुंदचरणौ सदा
शरणमहं प्रपद्ये॥ अस्य मुकुंदमंत्रस्य नारद ऋषिः॥ गायत्री छंदो मुकुंदगोपालो देवता॥ इष्टार्थे वि
नियोगः॥ श्रीमन्मुकुंदचरणौ हृदयाय नमः॥ सदा शिरसे स्वाहा॥ शरणं शिखायै वषट्॥ अहं कव
चाय हुं॥ प्रपद्ये अस्त्राय फट्॥ ततो ध्यानं॥ उपसंहृतदिव्यांगं रूढदंतं मातुरंतिकं॥ चलद्दृष्ट्यश्वरणं बा
लं लीलांगसंस्मृतं जपेत्॥१॥ ध्यानादिकं दशाक्षरवत्॥ प्रातः पिबेज्जलस्तो यंजमेयो द्वोत्तरं शतं॥ अनेन
षड्भिर्मासैः सनवेतस्क्रुति धरो बुधः॥१॥ अथ बाललीलामंत्रो द्वादशाक्षरः॥ समस्तमरुन्नमितबालली
लात्मने हुं फट् नमः॥ अस्य नलकूबर ऋषिः गायत्री छंदो बालकृष्णो देवता इष्टार्थे विनियोगः॥ पदैः
पंचांगानि॥ ध्यानं॥ लंबितैर्बालरूपायने रूढदंतं वक्षस्यजिनैः॥ प्रेक्ष्यमाणं अग्रबुध्याऽऽतं यजेत्सोऽस्तु ते ध्यानं॥
ध्यानादिकं पूर्ववत्॥ अथ यात्राधिपतिगोपालमंत्रस्त्रिंशदक्षरः॥ अनरूपरसरूपत्व शरूपनमो नमस्त्र
त्राधिपतये ममान्न प्रयच्छ स्वाहा॥ अस्य नारद ऋषिरनुष्टुप् छंदः॥ अन्नाधिपतिर्देवता इष्टार्थे विनि

योगः। अन्नाधिपतय इत्यादि पंचपदैः पंचांगं। ध्यानं किरीटकुंडलधरं श्रीवत्सांगं सकौस्तुभं। शंखच
क्रगदापद्मधारिणं चिंतयेद्धरिं। एवं विचिंत्य वैष्णवपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्। स्व
ष्टे नमः। किरीटाय। कुंडलाय। चक्राय। शंखाय। गदायै। पद्मायनम इति पत्रेषु पूजयेत्। वासुदेवाय।
संकर्षणाय। प्रद्युम्नाय। अनिरुद्धायनम इत्यग्न्यादिकोणेषु। शांत्यै। आज्येन मधुस्त्रं होमः। वक्रावल्मृ
गो विंदं शुक्लपुष्पैः सतंडुलैः। आज्याक्तैरयुतं कृत्वा नस्मतन्मूर्द्धि धारयेत्। तस्मान्नादिसमृद्धिः स्यात्तद्वषे
सर्वयोषितः। अथ वासुमंत्रः षोडशाक्षरः। ॐ नमो भगवते वासुदेवाय हुं फट् स्वाहा। अस्य ब्रह्मा ऋ
षिः देवीगायत्री छंदो गृहदारूपो विष्णुर्देवता इष्टार्थे विनियोगः। निजपादांबुजासक्तमत्राकटं चिंतयेज्ज
पेत्। अथ चक्रादिभिरंगानि दिक्पालैरस्त्रैश्चावरणं। लक्षं पुरश्चरणं। पयःसर्पिःस्तंडुलैर्दीर्वाञ्छितैर्दशांशो मंत्र
होमः। अथायुःप्रदगोपालमंत्रो द्वात्रिंशदक्षरः। ॐ नमो भगवते वासुदेवाय पुरुषोत्तमस्थायुर्देहि मे वि ११२
लवेप्रन विष्णवे नमः। अस्य नारद ऋषिः अनुष्टुप्छंदः आयुःप्रदो विष्णुर्देवता इष्टार्थे विनियोगः। द्वा

दशापंचपंचाष्टद्विसंख्यैर्मंत्राक्षरैरंगानि। अथवा। आनंदात्मने हृदयाय नमः। प्रीत्यात्मने शिरसे स्वाहा। ज्यो
तिरात्मने शिखायै वषट्। मायात्मने कवचाय हुं। विद्यात्मने अस्त्राय फट्। ध्यानं। धारयंतं बकं दोर्भ्यां नि
वेयुःस्मुस्निग्धश्वेते। गोरक्षायां करणवेणुं धारयंतं पशूंस्तथा। अथ मंत्रांतरमष्टादशाक्षरं। अथ गोपालक
वेषधराय वासुदेवाय हुं फट् स्वाहा। अस्य नारद ऋषिर्गायत्री छंदः। वासुदेवो देवता इष्टार्थे विनियोगः
हुंनीनमा दिक्षेडांते इष्टमूर्तिं स्मरन् हरिं। नृत्यंतं कालियफणारंगे अन्यतरमस्य सेत्। अन्यत् सर्ववत्॥
अथ कालियमर्द्दनमंत्रो द्वात्रिंशदक्षरात्मकः। कालियस्य फणामध्ये दिव्यं नृत्यं करोतीति तं। नमामि देवकी
पुत्रं नृत्यराजानमच्युतं। अस्य नारद ऋषिः अनुष्टुप्छंदः कालियमर्द्दनो विष्णुर्देवता। इष्टार्थे विनियो
गः। चतुर्भिः पादैः समस्तेन चांगानि। वैष्णवपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्। अंगैर्दिक्पालैरस्त्र
दायुधैरावरणानि। लक्षं पुरश्चरणं। सर्पिषा अयुतं होमः। अथ गोपालमंत्रः षडक्षरः। क्लीं कृष्णाय नमः। कृष्णा
दिकं पूर्ववत्। अथ विंशत्यक्षरः। ह्रीं श्रीं क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा। कृष्णादिकं अष्टाद

शाक्षरमंत्रवत्॥ भूतबालतनुं सद्योजातं क्रमणिसंप्रभं। पीतांबरं लसच्चक्रशंखशार्ङ्गगदांबुजं॥ सद्योजा
तं तत्स्मरणात्कांतं। पूजादिकं पूर्ववत्॥ लक्षं पुरश्चरणं। त्रिमधुराक्तैः फलाद्याकुसुमैरयुतं होमः॥ अथ द्वादशा
क्षरः॥ श्रीं ह्रीं क्लीं श्रीकृष्णाय गोविंदाय स्वाहा॥ अस्य ब्रह्मा ऋषिर्गायत्री छंदः श्रीकृष्णो देवता। इष्टार्थे विनियोगः॥
श्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। क्लीं शिखायै वषट्। कृष्णाय कवचाय हुं। गोविंदाय नेत्रत्रयाय वौषट्।
स्वाहा अस्त्राय फट्॥ ध्यानादिकं विंशतिवर्णवत्। गोपालमंत्रः षोडशाक्षरः॥ श्रीं ह्रीं क्लीं गोपीजनवल्लभाय
स्वाहा। क्लीं ह्रीं श्रीं। स्पष्टे सर्वं पूर्ववत्॥ अथ द्वादशाक्षरः॥ ह्रीं श्रीं गोपीजनवल्लभाय स्वाहा॥ अस्यापि सर्वं दशा
र्णवत्॥ आचक्राय स्वाहा इति षडंगं॥ ध्यानं॥ वरदाभयहस्ताभ्यां श्लिष्टं तं स्वांगगे प्रिये। पद्मोत्पलकरे ताभ्यां श्लि
ष्टं चक्रं वरोद्भ्रलं। इति ध्यात्वा पूजयेत्॥ लक्षं पुरश्चरणं। आज्यैर्दशांशो होमः॥ अथाष्टाविंशत्यक्षरमंत्रः॥ ॐ न मंत्र॰
मो भगवते नंदपुत्राय नंदवपुषे गोपीजनवल्लभाय स्वाहा॥ अस्य नारद ऋषिरुष्णिक् छंदः गोपालो देवता इष्टा ११३
र्थे विनियोगः॥ आचक्राय स्वाहेति षडंगं॥ ध्यानं॥ दक्षिणे रत्नचषकं वामे सौवर्णवेत्रकं। करे दधानं देवीभ्यां माश्लि

ष्टं चिंतये द्धरिं॥ अंगैः प्रथमावृत्तिः। दिक्पालैर्द्वितीया॥ तदायुधैस्तृतीया॥ लक्षं पुरश्चरणं। पायसैर्दशांशो हो
मः॥ अथाष्टाविंशत्यक्षरश्चानंदगोपालमंत्रः॥ ॐ नमो भगवते नंदपुत्राय नंदनवपुषे गोपीजनवल्लभाय स्वा
हा॥ तस्यास्यैवापरो द्वात्रिंशदक्षरः॥ नंदपुत्राय श्यामलांगाय बालवपुषे गोपीजनवल्लभाय स्वाहा॥ अनयोर्ना
रद ऋषिः उष्णिगनुष्टुभौ छंदसी॥ श्रीगोपालो देवता॥ इष्टार्थे विनियोगः॥ आचक्राद्यैरंगानि॥ ध्यानं पूर्वोक्तं ध्या
त्वा वैष्णवपीठे समावाह्य पूजयेत्॥ लोकपालैस्तदायुधैश्चावृत्तिः॥ लक्षं पुरश्चरणं। पायसैर्दशांशो होमः॥
अथ रुक्मिणीवल्लभमंत्रः षोडशाक्षरः॥ ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा॥ अस्य नारद ऋषिरनुष्टुप्
छंदः रुक्मिणीवल्लभो देवता इष्टार्थे विनियोगः॥ ॐ हृदयाय नमः। नमः शिरसे स्वाहा। भगवते शिखायै व
षट्। रुक्मिणीवल्लभाय कवचाय हुं। स्वाहा अस्त्राय फट्॥ ध्यानं॥ तापिच्छच्छविरंगगां प्रियतमां स्वर्णप्र
भामंबुजप्रोद्यद्दाम अनुजां मुखाब्जलतया श्लिष्यन् विचित्रामयो। श्लिष्यंती स्वयमन्यमन्यविलसत्सौव त्र
र्णकुंभो चिरं पायाद्दोत्रामनसमुपीतवसनो नानाविभूषो हरिः॥ अंगैः प्रथमावरणं। नागराद्यैर्द्वितीया दि

कानिस्थानीयं। तदस्यैश्चतुर्थं जपांते देवं विसर्जयेत्। एतत्पुरश्चरणं। अथ गोवल्लभमंत्रः मनोहरः। गो
वल्लभाय स्वाहा। अस्य नारद ऋषिरनुष्टुप्छंदः गोवल्लभगोपालो देवता इष्टार्थे विनियोगः। ध्यानं। योसु
रःमकपिलागणमध्यसंस्थः आक्रंदनेदधदक्षिणदोष्णि वेणुं। पाशं सव्यस्थिमयरत्नपयोदनीलपीतांबरा
लिरिपुपिच्छकृतावतंसः। पूजादिकं पूर्ववत्। सप्तलक्षं पुरश्चरणं। सप्तसहस्रं तीरे होमः। अथ दशा
क्षरः। ॐ नमो भगवते श्रीगोविंदाय। अस्य नारद ऋषिः गायत्री छंदः श्रीगोविंदो देवता इष्टार्थे विनियोगः।
ॐ हृदयं। नमः शिरसि। भगवते शिखा। श्रीगोविंदाय कवचं। ॐ सप्तस्वेनास्त्रं। ततो ध्यानं। वंदे कल्पद्रुमाधःसि
तसुमणिमये स्थानेमंनिविष्टं नीलाभं पीतवस्त्रं करकमललसच्छंखवेत्रं मुरारिं। गोभिःसक्तःस्मेर
सिक्तं मणिमयश्रोतहस्तस्कंधे प्रच्छोक्षोवाधधारास्नापितमजितवेदो जपेत्सामनस्कं। इति ध्यात्वा विघ्न मंत्र·
वर्षाविदेवमावाह्य पूजयेत्। अग्रे पद्मीशाय नमः। पूर्वे चंडाय नमः। दक्षिणे धात्रे विधात्रे नमः। उत्तरे बाला १२४
यबलप्रदाय नमः। द्वारोर्ध्वद्वार श्रियै नमः इति पूजयेत्। द्वारपार्श्वयोः गंगायै यमुनायै। कोणेषु शंखनि

धये। पद्मनिधये। विघ्नाय दुर्गायै। वारुणेन नमः। वेश्ममध्ये वास्तुपुरुषेभ्यो नमः इति पूजयित्वा। देवमुद्वा
सयेत्। द्वादशलक्षं पुरश्चरणं। दुग्धैः द्वादशसहस्रं होमः। अथ गोकुलनाथमंत्रोष्टाक्षरः। गोकुलना
थाय नमः। अस्य ब्रह्मा ऋषिर्गायत्री छंदो गोकुलनाथो देवता इष्टार्थे विनियोगः। अष्टाक्षरेणैवांगानि।
समस्तेनास्त्रं। ध्यानं। पंचवर्षमतिदृप्तमंगणे धावमानमतिचंचलेक्षणं। किंकिणीवलयनूपुरैर हार
र्चितं नमत गोपबालकं। इति ध्यात्वा वैष्णवपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्। पूर्वादिदिक्षु
दलाग्रेष्वंगानि। पंचमं सर्वकोणेषु। वासुदेवाय संकर्षणाय प्रद्युम्नाय अनिरुद्धाय इति चतुर्दिक्षु पूज
येत्। रुक्मिण्यै सत्यभामायै सुलक्ष्मणायै जांबवत्यै नमः इति विदिक्षु पूजयेत्। इंद्रादीन् तदायुधानि
स्वदिक्षु पूजयेत्। यो मंत्रं जपेन्नित्यं विधिनेत्यर्चयन् हरिं। सर्वसंपत्सु मंत्रज्ञो नित्यस्थं पदं व्रजेत्।
अथ एकाक्षरः। क्लीं इति एकाक्षरः। क्लीं कृष्ण इति त्र्यक्षरः। क्लीं कृष्णाय नमः इति सप्ताक्षरः। क्लीं कृष्णा
य गोविंदाय इत्यष्टाक्षरः। दधिभक्षणाय नमः इत्यपरोष्टाक्षरः। क्लीं दधिभक्षणाय इति नवाक्षरः।

क्लींकृष्णायगोविंदायक्लींइत्यरोनवाक्षरःदशाक्षराद्यःप्रवेक्ष्या॥एतेषांसर्वेषांमंत्राणांनारदऋ
षिर्गायत्रीछंदःकृष्णोदेवताइष्टार्थेविनियोगः॥क्लंक्लींइत्यादिषडंगं॥अथध्या॥कात्यायनीचेलांबुरुविर
रुणांभोजनेत्रांबुजस्थोबालोजंघाकटिस्थस्थलकलितरणत्किंकिणीकोमुकुंदः॥दोर्भ्यांदिव्यंगवीनं
दधदतिविमलंपायसंविश्ववंद्योगोगोपीगोपिभिःपरीतोरुरुनखविलसत्कंठभूषश्चिरंवः॥इतिध्यात्वावेणु
वपीठेदेवमावाह्यपाद्यादिभिरुपचारैःपूजयेत्॥तद्वदिरिंशादीनतद्वदिहस्तदायुधानिचपूर्ववत्॥प्रत्ये
कमेषांमंत्राणांयोजनजेन्मनुवित्तमः॥करप्रचेयात्सर्वार्थसिद्धिस्थानोपूज्यतेमरैः॥क्लींक्लींकृष्ण॥इत्येषचतु
रक्षरः॥ऋष्यादिकंपूर्ववत्॥ध्यानं॥श्रीमत्कल्पद्रुममूलोन्नतकमलसत्कर्णिकासंस्थितोयतत्रास्वा
लेविपर्यादरविगलदसंख्या॥तरत्नाभिषिक्तःइदेमांनःस्मरेजानित्रिभुवनमखिलंनासयन्वासुदेवः॥ मंत्रः
पायात्कपीतवानवरतनवनीतामृताशीवशीसः॥पूजादिकंपूर्ववत्॥लक्षचतुष्टयंपुरश्चरणं॥त्रिम २२५
धुराक्तैर्बिल्वपत्रैश्चत्वारिंशत्सहस्रंहोमः॥अथापरश्चतुरक्षरः॥क्लींक्लींसर॥ऋष्यादिकंपूर्ववत्॥क्लींक्लीं

मित्यादिषडंगं॥ध्यानं॥आरक्तोद्यानकल्पद्रुमपरिविलसत्स्वर्णदोलाधिरूढंगोपीभ्यांप्रेंख्यमाणंवि
कसितनववधूकर्मिंदुरवारं॥बालंलीलालकांतंकटितटविलुठत्क्षुद्रघंटाघटाढ्यंवंदेशार्दूलका
मांकुजालमितगलाकल्पदीप्तंमुकुंदं॥इतिध्यात्वावेणुवपीठेदेवमावाह्यपाद्यादिभिरुपचारैःपूजयेत्
अंगपूजादिकंपूर्ववत्॥लक्षचतुष्टयंपुरश्चरणं॥मधुरत्रयाक्तैरक्तोत्पलैर्दशांशोहोमः॥अथगोपालमंत्रो
पयोगीगायत्री॥त्रैलोक्यमोहनायविद्महेगोपीस्मरायधीमहि॥तन्नःकृष्णःप्रचोदयात्॥एषाविष्णुगाय
त्रीमंत्रजपादौजप्याद्दुरितहारिणीश्रीप्रदाच॥अथसप्तदशोरिमंत्रोद्विपंचाशदक्षरः॥ऐंक्लींश्रींह्रांह्रींह्रोंक्लीं
जयजयकृष्णनिरंतरक्रीडासक्तप्रमुदितचेतसेनित्यप्रियायकृष्णायक्लींगोपीजनवल्लभायस्वाहाश्रींक्लीं
ऐं॥अस्यमंत्रस्यनारदऋषिःप्रसृताविराट्छंदः॥त्रिजगद्विमोहनोदेवता॥सकलपुरुषार्थसिद्धयेविनियो
गः॥अष्टादशाक्षरमष्टाक्षरचतुर्दशार्णमंत्राक्षरैर्बीजत्रयपुटितैर्मंत्रांतबीजैरंगन्यासः॥पूर्वोक्तंलक्ष्मीसर
स्वतीभ्यांमाश्लिष्टंध्यात्वावेणुवपीठेदेवमावाह्यपाद्यादिभिरुपचारैःपूजयेत्॥अंगैः॥प्रथमावरणं॥को

णकोसरेषुवारान्लक्ष्म्याद्यादलमध्येतद्बहिःध्वजमुखानंत्रगे।केतवोष्टष्टेवरुणाय।पार्श्वद्वयेशंख।
निधयेपद्मनिधयेनमइतिप्रजयेत्।हेरंबाय।माऽस्मःदुर्गायै।विष्वक्सेनायनमइतिविदिक्षुप्रजयेत्।
इंद्रादीस्तद्बहिस्तदायुधानिचप्रजयेत्।लब्धंपुरश्चरणं।पायसैर्दशांशोहोमः।इत्यर्चयित्वाच्युतमादरेण।
योमुंजपन्मंत्रवरंपरात्मा।सोऽस्यर्चतिदिव्यजनैर्नतानांदृग्नेत्रपंकेरुहतिग्मभानुः।अथकामगाय
त्रीगोपालमंत्रदीपिनी।कामदेवायविद्महेपुष्पबाणायधीमहि।तन्नोनंगःप्रचोदयात्।अथाष्टच
त्वारिंशदक्षरःकाममंत्रः।नमःकामदेवायसर्वजनप्रियायसर्वजनसंमोहनायज्वलज्वलप्रज्वल
सर्वजनस्यहृदयंममवशंकुरुकुरुस्वाहा।जपादीमारबीजाद्यःएषमदनमंत्रोमदनगोपाल
मंत्रजपेजप्यः।अन्यस्त्वात्मानंसमर्प्यार्चितन्मयःप्रजपेन्मनुं।रक्तांत्रिषेकध्यानेयोविंशत्यर्णश्रितेरि मंत्र
तः।जपहोमार्चनध्यानेयोमुंप्रभजतेमनुं।तद्गेहंसंश्रयतिरत्नैर्धनधान्यैरखारितं।अथसारस्वतो १२६
गोपालमंत्रोद्वाविंशत्यक्षरः।ऐंक्लींकृष्णायह्रींगोविंदायश्रींगोपीजनवल्लभायस्वाहासौं।अथध्या

दशार्णवत्सर्वध्यानं।वामोर्ध्वहस्तेदधतंविद्यासर्वस्वपुस्तकं।अक्षमालांचदक्षोर्ध्वस्फाटिकींमातृ
कामयीं।स्वस्तत्रस्वमयींवेणुंवामदक्षकरयोरितं।गायंतंपीतवसनंश्यामलंकोमलच्छविं।बर्हिवि
र्हत्तोत्तंसंसर्वज्ञंसर्वविदिनं।पूजादिकंविंशत्यक्षरवत्।अथसामान्यतोनैवेद्यमंत्रःषोडशाक्ष
रः।क्लींपरमात्मनेनिरुद्धायनैवेद्यंकल्पयामि।अथात्मसमर्पणमंत्रःपंचदशाक्षरः।मामदीयमा
त्मानंदरयेसमर्पयामि।इत्यात्मनःसमर्पणंयोगिनःकुर्वंति।अथसर्वगोपालमंत्रसामान्यविधिःप्रजा
लिख्यते।ॐश्रांअयिमत्रारायमनाराचायक्रुंफट्स्वाहा।इतिदशारिसंस्कृत्यविसृज्य।ॐगुरुभ्योनमः।पर
मगुरुभ्योनमः।नारदादिभ्यःसिद्धेभ्योनमः।भागवतेभ्योनमः।ततोदक्षिणेविघ्ननाशायनमः।इतिसंप्र
ज्यवेश्मवपीवेगोपालमूर्तिमावाह्यप्रजयेत्।रुक्मिण्यैनमःसत्यभामायैनमः।इतिपार्श्वयोः।इंद्रायनम
इत्यग्रतः।मुरेभ्योनमइतिपृष्ठतः।केसरेष्वंगदेवतादिक्षुस्त्रं।कालिंग्यादयोदलेषु।किंकिणीदाम्नेवेणवे
नमइत्यत्यग्रतः।श्रीवत्साय।कौस्तुभाय।वनमालायै।स्वस्थाने।पांचजन्यं।गदाचक्रंपद्मंवासुदेवंदेवकीं

नंदंयशोदांदिक्षु।कुमुदाद्यष्टौ।पुंडरीकंवामनंत्रांकं कर्णंसर्वनेत्रं।सुमुखं।सुप्रतिष्ठितंश्च जयेत्।अथ
पुरुषोत्तममंत्रः त्रयोदशाक्षरः।ॐक्लींश्रीपुरुषोत्तमायहुंफट्स्वाहा।अस्यमंत्रस्यब्रह्माऋषिर्गायत्रीछं
दः।पुरुषोत्तमोदेवता।क्लींबीजंश्रीशक्तिःइष्टार्थेविनियोगः।ॐहृदयायनमः।क्लींशिरसेस्वाहा।श्रींशिखा
यैवषट्।पुरुषोत्तमायकवचं।हुंफट्नेत्रं।स्वाहाअस्त्रं।ध्यानं।परिरभ्वरमंविष्णुरक्तवर्णंचतुर्भुजं।शंख
चक्रगदापद्मधारिणंपुरुषोत्तमं।इतिध्यात्वापाद्यादिभिरुपचारैःवैष्णवपीठमावाह्यपूजयेत्।अंगैःप्र
थमावरणं।वासुदेवाय।संकर्षणाय।प्रद्युम्नाय।अनिरुद्धायनमइतिदिक्षु।शांत्यैश्रियैसरस्वत्यैरत्यै
नमइतिकोणेषु।शंखाय।चक्राय।गदायै।पद्माय।मुशलाय।धनुषे।पाशाय।अंकुशायनमइतिद्वा
रिपत्रादिकोणेषु।कुमुदादिभिःलोकपालैश्च।नवलक्षंपुरश्चरणं।कमलैस्तावत्सहस्रंहोमः।अथपुरु मंत्र
षोत्तमसामान्यमंत्रोद्विशताक्षरः।ॐश्रींक्लींश्रींनमःपुरुषोत्तमअप्रतिमरूपलक्ष्मीनिवासकलजगत्क्षो ११७
भकेणसर्वस्त्रीहृदयविदारणत्रिभुवनमदोन्मादकरासुरमनुजसुंदरीमनांसितापयतापयदीपयदीपय

शोषयशोषयमारयमारयस्तंभयस्तंभयमोहयमोहयद्रावयद्रावयआर्षैकेयआकर्षयसमस्तपरम
सुभगसौभाग्यकरसर्वकामप्रदअमुकंहनहनचक्रेणगदयाखड्गेनसर्वबाणैः।भिंधिभिंधिपाशेनकंकें
कुशेनताडयताडयकुरुकुरुकिंतिष्ठसितावद्यावत्समीहितंभवतिहुंफट्नमः।अस्यपुरुषोत्तममंत्र
स्यजैमनिऋषिरमितंछंदः।समस्तजगदादिपुरुषोत्तमोदेवता।क्लींबीजंश्रीशक्तिः।चतुर्विधपुरुषार्थ
सिद्धयेविनियोगः।ॐक्लांक्लींश्रींपुरुषोत्तमत्रिभुवनमदोन्मादकरहुंफट्नमःहृदयायनमः।ॐह्रींक्लीं
श्रींसकलजगत्क्षोभणलक्ष्मीनिवासहुंफट्नमःशिरसेस्वाहा।ॐक्लूंक्लूंश्रूंमन्मथोत्तमांगजेकारीपिनिद्धं
फट्नमःशिखायैवषट्।ॐक्लैंक्लैंश्रैंपरमसुभगसर्वसौभाग्यकरहुंफट्नमःकवचायहुं।ॐक्लौंक्लौंश्रौंसु
रासुरमनुजसुंदरीहृदयविदारणसर्वप्रदरणसर्वकामिकदहनदहनहृदयबंधनाभिआकर्षयआकर्षय
महाबलहुंफट्नमःनेत्राभ्यांवौषट्।ॐक्रःक्रःश्रःत्रिभुवनेश्वरसर्वजनमनांसिदहनदहनदारयदारय
मवक्रामानयहुंफट्नमःअस्त्रायफट्।इतिषडंगंविधायध्यायेत्।देवींश्रीपुरुषोत्तमैकमन्यास्वांग

स्थयापंकजंबिभ्रत्यापरिरब्धमंबुजरुचातस्यांनिबाधेस्मरेणं।ध्यायेतचेतसिषड्भुजंपाशांकुशालोंध्यायामि
स्वङ्गंगदांहस्तैरंकुशामुद्वहंतमरुणंस्मेरारविंदाननं।दक्षिणेर्द्धकरमारभ्यशंखादीनिवादक्षि
णेनध्येयानि।इतिध्यात्वापूर्वोक्तवैष्णवपीठेयजराजायस्वाहा।इतिपीठंपूजयित्वा।तत्रदेवमावा
ह्यपाद्यादिभिरुपचारैःपूजयेत्।ॐत्रैलोक्यमोहनहृषीकेशाप्रतिमरूपमन्मथसर्वस्त्रीहृदयाक
र्षणागच्छागच्छनमः।इत्यनेनमंत्रेणव्यापकन्यासावाहनादिकंकुर्यात्।त्रैलोक्यमोहनायविद्महे
हृषीकेशायधीमहि।तन्नोविष्णुःप्रचोदयात्।इत्यनयागायत्र्याश्रोहरणंकुर्यात्।तदर्चनंइत्यस्या
एवंदेवंपूजयित्वा।श्रीवत्सायनमः।इतिस्तनस्योपरि।कौस्तुभायइतिवक्षसि।वनमालायैनमःइति
कंठे।ततोंगावरणं।स्त्रांरुक्मिण्यैनमः।श्रीसरस्वत्यैनमः।स्त्रूंरत्यैनमः।स्त्रैंप्रीत्यैनमः।स्त्रैंकांत्यैस्त्रोंशांत्यैस्त्रौं मंत्र·
तुष्ट्यैनमः।स्त्रंपुष्ट्यैनमःइतिपत्रेषुपूजयेत्।जलचरायशंखायनमः।शार्ङ्गायसशरायस्वाहाधनुषेनमः ११८
सुदर्शनमहाचक्रराजविदारयविदारयपरमंत्रान्ग्रसग्रसभक्षयभक्षयत्रासयत्रासयहुंफट्

चक्रायनमः।षड्जतीक्ष्णछिंधिछिंधिकंगेकंगेस्वाहाखड्गायनमः।कौमोदकिमदाबलेसर्वासुरांत
किप्रमीदहुंफट्स्वाहागदायैनमः।ॐकुशाकंवेकंवेऽकुशायनमः।संवर्त्तकमुशलपोथयपोथय
हुंफट्स्वाहामुशलायनमः।पाशबंधबंधआकर्षयआकर्षयस्वाहापाशायनमः।इतिदलेषुपूज
येत्।लोकपालांश्चस्वदिक्षुतदस्त्राणिचसंपूज्ययथाशक्तिजपंनिवेद्यसुहृदिदेवमादाययथाश
क्तिसुखंविहरेत।चतुर्लक्षपुरश्चरणं।दशांशेनिषेकः।दधिघृतक्षीराक्ताःतिलाःपृथक्शतंजु
हुयात्।क्षीरमिश्रितंचरुन्साज्यंमदस्त्रमश्ततान्सहस्त्रंतिलान्।दधिमधुघृताक्ताभिःपृथक्सह
स्रंपलाशसमिधःशतंजुहुयात्।गुरवेदक्षिणांदद्यात्ब्राह्मणान्भोजयेच्चसुजानां।इत्थमभ्यर्चयान्नित्यं
यथावत्पुरुषोत्तमं।प्राप्नोतिमहतींलक्ष्मींसौभाग्यमतुलंयशः।आयुरारोग्यमैश्वर्यमभाजीष्ठानिवि
दति।दयारिकुसुमैर्देवमर्चयित्वायथाविधि।शक्तिप्रमर्लेजुहुयाद्दशोत्तरसहस्रकं।मासमात्रेणव
शगास्तस्यस्युःसर्वेजंतवः।यस्यनामस्मृतंमंत्रंजपेदयुतसंख्यया।सस्नवेद्वानरेंद्रोपिवशमायातिनि

च्छितं। ओं छितं समवाप्नोति नात्र कार्या विचारणा। एवं उक्ता वैष्णवा मंत्राः षडशीति संख्यकाः। इति
श्रीमदाशादित्यत्रिपाठी संगृहीते मंत्रकोशे वैष्णवमंत्रकथनं नाम पंचदशः परिच्छेदः॥ ॥श्रीरस्तु॥
कथ्यंते नृहरेर्मंत्राः सर्वपापप्रणाशकाः। आचारशौचनिष्ठानां भुक्तिमुक्तिफलप्रदाः। अथ नरसिंह
मंत्राः। अत्याचारशौचयुक्तानां तत्र तु कुलाः शीघ्रमभीष्टफलदा भवंति। तत्रादौ नरसिंहमंत्रस्यानुष्टु
प्छंदः। उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं। नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं॥ अस्य मंत्रस्य ब्र
२ ह्माऋषिः अनुष्टुप्छंदः। नृसिंहो देवता। नृसिंहइत्यत्र ईं इति त्रिष्टुप्कीलकं ज्ञानं तत्क्षिप्रप्रतिबंधकं।
स इति हृष्टं कीलकं ज्ञानं मम सिद्धिदं। इंद्राक्तिः। अत्र बीजं। श्वेतो वर्णः इष्टार्थे विनियोगः। उग्रं वीरं हृदया
यनमः। महाविष्णुं शिरसे स्वाहा। ज्वलंतं सर्वतोमुखं शिखायै वषट्। नृसिंहं भीषणं कवचाय हुं। भद्रं मृ मंत्र
त्युमृत्युं नेत्रत्रयाय वौषट्। नमाम्यहं अस्त्राय फट्। शिरोललाटनेत्रमुखकरपादसंध्यग्रोदरहृदय ११९
गलपार्श्वद्वयपृष्ठककटिष्वृद्दिक्षु न्यासः। ततो ध्यानं। जान्वोरासक्ततीक्ष्णास्त्रनखमुखविलसद्बाहुसंद

ष्टकेयूरचक्रं च शंखं च दोर्भ्यां दधदनलसमज्योतिषा भिन्नदैत्यः। ज्वालामालापरीतं रविशशिदहना
त्रीक्षणं दीप्तजिह्वं दंष्ट्रोग्रं भूतकेशं वदनमपि वहन्पातु वो नारसिंहः॥१॥ ध्यानकाले कोपशांत
ये दक्षिणबाहुसंस्थं रूपं शिवं स्तौति। वामबाहुसंस्थं रूपं ब्रह्माणमिति। सौम्यध्यानं। एवं ध्यात्वा ना
रायणमंत्रोक्तपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्। ततोंगावरणं। पक्षीन्द्राय नमः शं
कराय नमः। शेषाय नमः। इति श्रवादिदिक्पत्रेषु पूजयेत्। श्रियै। ह्रियै। धृत्यै। पुष्ट्यै नमः इति कोण
पत्रेषु। लोकपालांस्तदस्त्राणि च तद्बहिः। एवं पूजयित्वा जपं निवेद्य सुहृद्दिशं उद्वासयेत्।
अयं मंत्रः प्रणवभुवनेश्वरीसंपुटितो जप्यः। द्वात्रिंशद्युतं पुरश्चरणं। द्वात्रिंशल्लक्षजपात्सिद्धो भ
वति। अत्राज्याक्तैः कमलैस्त्रावस्त्र दशांशहोमः। इत्थं जपादिभिः सिद्धे मनौ काम्यानि साधयेत्। तत्र ध्यानं।
उद्यत्कोटिरविप्रभं नरहरिं कोटीरहारोज्ज्वलं दंष्ट्राभीममुखं ललसन्नखमुखे दक्षे दरं नेत्रैस्त्रिभिः। नि
र्भिन्नासुरनागमग्निशशिसूर्यात्मनेत्रत्रयं विद्युत्पुंजजटाकलापनयदं वह्निं भजं तं भजे॥२॥

तिक्रूरध्यानं ॥ सौम्यं सौम्ये स्मरेत्कार्ये क्रूरे क्रूरमिमं भजेत् । श्रीफलैर्जुहुयान्मंत्री बिल्वकाष्ठेधितेनले ।
महस्रं श्रियमाप्नोति पत्रैर्वा बिल्वसंभवैः । प्रसूनैर्वा फलैस्तद्वत् हविर्होमादरोगिता । मंत्रजप्तां वचां
श्वेतां भक्षयेत्प्रातरन्वहं । वाक्सिद्धिं लभते मंत्री वाचस्पतिरिवापरः ॥ ६ ॥ उक्तितो निशि संजातेस्नात्वा मंत्र
ममुं जपेत् । अनिद्रो मंत्रविन्यासात्सुषुप्तिमुपजायते । व्याघ्रचोरमृगादिभ्यो महारण्ये भयाकुलः । रक्षेत
मनुरयं जप्तो भये ह्यन्येषु मंत्रिणां ॥ ५ ॥ अनेन मंत्रितं भस्म विषग्रहमहाभयान् । नाशयेद्विरान्मंत्री मं
त्रस्यास्य प्रभावतः । हसिंहरूपं महानीमं नखदंष्ट्रातिभीषणं । ध्यात्वात्मानं रिपुं पश्चाद्ध्यायेन्मृगशिशु
पुनः । ७ग्रहीत्वा गलदेशे तं पुनर्दिक्षु क्षिपेत् द्रुतं । पुत्रमित्रकलत्राद्यैरुच्चाटो जायते रिपोः ॥ ८ ॥ सर्वम्र
सुपदेसाध्यं नामसत्त्वा स्वयं हरिः । निशितैर्नखदंष्ट्राद्यैः पाटमानं रिपुं जपेत् । ९ नित्यमष्टोत्तरशतं ज
पेन्मंत्रमतंद्रितः । जायते मंडलादर्वाक् शत्रुवैरं स जन्प्रियं ॥ १० ॥ अथ नृसिंहबीजं । क्ष्रौं । क्ष्रौं । अस्यापि ऋ
ष्यादिकं पूर्ववत् । क्ष्रूं क्ष्रौं इत्यादि षडंगं ॥ अथ सप्तमषष्ठाक्षरो ज्वालामालिनी मंत्रः । ॐ ह्रौं नमो भगवते न

रसिंहाय ज्वालामालिनि दीप्तदंष्ट्राय अग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय सर्वज्वरविनाशाय
दह दह पच पच रक्ष रक्ष हुं फट् स्वाहा । अस्यापि ऋष्यादिकं पूर्ववत् । ॐ क्ष्रौं भगवते नरसिंहाय हृदयाय
नमः । ज्वालामालिने दीप्तदंष्ट्राय शिरसे स्वाहा । अग्निनेत्राय शिखायै वषट् । सर्वभूतविनाशाय सर्वज्वर
विनाशाय कवचाय हुं । दह दह पच पच रक्ष रक्ष नेत्राभ्यां वौषट् । हुं फट् स्वाहा अस्त्राय फट् । इति षडंगं
विधाय ध्यानं कुर्यात् । उद्यज्ज्वलज्ज्वलनयानलाभं युग्मनेत्रमनारंभं । स्वैरोरंध्राग्निनःशिखाभिरुद्यद्दं
ष्ट्रमहाभुजं । रक्तस्नानयदं विकीर्णजटाकलापभीषणं । शंखचक्ररूपाणखेटकधारिणं च सिंहं भजे । १
इति ध्यात्वा पूर्वोक्तपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत् । आवरणादि पूर्वोक्तदेवताः पूजयेत् । एवं
पूजानंतरं यथाशक्ति जपित्वा विसर्जयेत् । लक्षं पुरश्चरणं । कपिलाज्येन दशांशो होमः । प्रयोगादिकं मंत्ररा
जोक्तं । विशेषात् सर्वभूतविनाशनोयं । अथ षडक्षरः । आं क्रीं क्ष्रौं क्रौं हुं फट् । अस्य ब्रह्मा ऋषिः पंक्तिश्छंदः
क्ष्रौं बीजं । क्रीं शक्तिः । नरसिंहो देवता । इष्टार्थे विनियोगः । क्ष्रं क्ष्रां क्ष्रीं क्ष्रूं क्ष्रैं क्ष्रौं क्ष्रः । इति षडंगं । ध्यानं ।

कोपादालोलनेत्रं विवृतनिजमुखं सोमसूर्याग्निनेत्रं पादाद्यानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येंद्रगात्रं।
चक्रं शंखं सपाशांकुशकुलिशगदादारुणान्युद्वहंतं भीमं तीक्ष्णनिदंष्ट्रं मणिमयविविधाकल्पमीडे नृ
सिंहं।१ एवं ध्यात्वा शर्वेकिपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्। ततोंगावरणं। चक्राय। शंखाय।
पाशाय। अंकुशाय। वज्राय। कौमोदक्यै। खड्गाय। खेटकाय नमः इति पूर्वादि दिक्पत्रेषु पूजयेत्। लोकपालांश्च
स्वदिक्षु। तदस्त्राणि च पूजयेत्। ततो देवं विसर्जयेत्। घृतेन षट्सहस्रं होमः। यथोक्तै रमृताखंडैस्त्रिसह
स्रं च चतुर्दशान्। अनेन विधिना होमः क्रूरग्रहविनाशनः। इत्यादिप्रकारैः किं बहुना केन मंत्रेरेतैरुदीरितैः
समो नास्ति मनुः कश्चित्कोपानुग्रहकारकः।२ इति लक्ष्मीनृसिंहः। श्रीं वीनुष्टुप्वीजाद्यः। अस्य ब्रह्मप्रजापतिऋषि
रनुष्टुप्छंदः। लक्ष्मीनृसिंहो देवता इष्टार्थे विनियोगः। ईं हं उग्रं वीरं महाविष्णुं ज्ञानेदात्मने हृदयाय नमः। मंत्र·
ईं हं ज्वलंतं सर्वतोमुखं प्रियात्मने शिरसे स्वाहा। ईं हं नृसिंहं भीषणं भं ईं ज्योतिरात्मने शिखायै वषट्। ईं १२२
हं मृत्युमृत्युं नमाम्यहं मायात्मने कवचाय हुं। ईं हं समस्तेन स्फ्रौं आत्मने अस्त्राय फट्। क्रोधहंता दिशांतये

दक्षिणबाहुं संस्पृश्य नरो ज्ञात्वा मंत्रं जपेत्। मंत्रस्तु। ॐ नमः शिवाय महाशालनाय स्वाहा। स्वरक्षार्थं वा ने
कानि मंत्ररक्षासंपुटितानि संति। तानि ग्रंथगौरवात्र लिखितानि। महाभये श्रुते मंत्रांते एवं ग्रीनीषणं
क्षिंक्षिंक्षिंक्षिनीषणंग्री। अथ रामे त्रांते रक्षास्तेति पठेत्। मंत्रन्यासादौ रक्षा यथा। केशवः पातु मे पादौ हृदयं
पातु वामनः। जंघे नारायणो मम। माधवो मे कटिं पातु गोविंदो गुह्यमेव च। नाभिं विष्णुस्तु मे पातु जठरं मधुसूदनः।
उरस्त्रिविक्रमः पातु हृदयं पातु वामनः। श्रीधरः पातु मे कंठं हृषीकेशो मुखं मम। पद्मनाभस्तु नयने शिरो दामोद
रो मम।१ एवमंगेषु विन्यस्य जपकाले मुलोचने। छायामपि नरः स्पृष्टु तिष्ठंते नालरात्तमाः।२ तस्मात्सर्वप्रयत्नेन
ध्यानं देवस्य चाचरेत्। पुरस्तात्केशवः पातु चक्री जांबुनदप्रभः।१ पश्चान्नारायणः शंखी नीलजीमूतसंनिभः।२
आग्नेय्याम रविंदाक्षो मुत्रालीमधुसूदनः। त्रिविक्रमः खड्गपाणिर्नैरृत्यां हलसनप्रभः।४ वायव्यां माधवो वज्री
तरुणादित्यसद्दीप्तिमान्। ऐशान्यां पुंडरीकाक्षः श्रीधरः पट्टिशायुधः। एवं विष्णुप्रनो हृषीकेशो अध ऊर्ध्वे दिशि मु
द्गरं। न्यसेत्तु पद्मनाभो मे सहस्रांशुसमप्रभः।१० सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः। इंद्रगोपकसंकाशः

पात्राहस्तोपराजितः॥२२॥सबाह्याभ्यंतरंदेहंव्याप्यदामोदरःस्थितः॥एवंसर्वत्रनिश्छिद्रंनामद्वादशपंजरं॥२३॥प्र
विष्टोहंनमेकिंचिद्भयमस्तिकदाचन॥इतिन्यासंप्रकुर्यात्॥इतिरक्षांविधायपूर्ववत्करपीठदेवतावाहनादिकाः
षट्मंत्राःप्रदर्शयेत्॥जितंतेपुंडरीकाक्षनमस्तेविश्वभावन॥नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज॥क्षीरोदेस
मुखेविष्टंतंसवरदंचक्रंपिनाकान्वयेबिभ्रंचंद्ररुचिर्महा॥हिचरणामृष्टोह्रस्वभूषणः॥आश्लिष्टोरमयोरगेंद्रफण
सहस्रातपत्रादधृकनीलग्रीवइदंपुनातुनृहरिर्योगपद्मासनः॥२४॥इतिध्यात्वापूजांतेउग्रंनमाम्यहं॥इत्यादि
नामभूर्हनवभिःपदैः॥ॐनीमाय॥उग्राय॥नयनाय॥नीलाय॥चक्राय॥भयंकराय॥विश्वेश्वरायकमलायैइति॥प्रा
गादिदलेषु॥श्रद्धायै॥ऋद्ध्यै॥समृद्ध्यै॥महस्यै॥कामायै॥महानन्दायै॥अनंतानायै॥दीप्त्यैनमइतितेषुचपूजयेत्॥
इत्याद्यनेकानिचरणानिसंति॥तान्यत्रनप्रपंचितानि॥एवंपूजयित्वायथाशक्तिजपित्वाविसर्जयेत्॥अथा मंत्र॰
तिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं॥सिद्धिर्भवतुमेदेवत्वत्प्रसादात्त्वदिस्थिता॥इतिजपंनिवेदयेत्॥न १२२
त्वास्तुत्वाविसर्जयेत्॥अस्यानेकप्रकाराःसंति॥अथविदारणनृसिंहोष्टाक्षरः॥ह्रौंजयजयनृसिंह॥अ

स्यमंत्रस्यप्रजापतिऋषिरनुष्टुप्छंदः॥विदारणनृसिंहोदेवता॥जंबीजं॥हंशक्तिःइष्टार्थेविनियोगः॥क्ष्रौंह्रीं
इत्यादिषडंगं॥अथध्यानं॥त्रिघोजरोज्जानुस्मृतिरतिविस्तृतोद्धुर्जसचीत्कारोद्दंष्ट्राचक्रंशंखचपाशांकुशाकुलि
शगदादारुणंरव्यंदक्षानः॥रक्षाकारस्यनानेरनुपरिमितोदिव्यनृषाविशेषोदेवोकांग्नीडनोत्रानमित
सुरवरोनारसिंहस्थिरंवः॥१॥पूजादिकंषडक्षरवत्॥अथदिव्यनृसिंहोनुष्टुप्॥तप्तहाटककेशांतज्वलत्पा
वकलोचनः॥वज्राधिकनखस्पर्शोदिव्यसिंहनमोस्तुते॥१॥अस्यब्रह्माऋषिरनुष्टुप्छंदोनृसिंहोदेवतात
कारोबीजंएकाक्षरंशक्तिःइष्टार्थेविनियोगः॥चतुर्भिःपादैःसमस्तेनचपंचांगं॥ध्यानादिकंपूर्ववत्॥अ
थद्वादशाक्षरोनृसिंहमंत्रः॥ॐक्ष्रौंमहानृसिंहायनमःक्ष्रौंॐ॥अस्यवामदेवऋषिर्विराट्छंदोमहानृसिं
होदेवता॥ह्रौंकारोबीजं॥ॐशक्तिःरक्षःकीलकं॥इष्टार्थेविनियोगः॥षडंगंध्यानादिकंपूर्ववत्॥अथत्र
योदशाक्षरंमंत्रांतरं॥सहस्ताररक्षालमृत्युनाशानस्वाहा॥आदित्यसोमसमार्चिरित्यादिध्यानंपूर्ववत्॥
अथवीरनृसिंहमंत्रःपंचपंचाशदक्षरः॥ॐनमोभगवतेवीरनृसिंहायकालामालापिनरौगायत्रिनेत्रायस

र्वभूतविनाशनायसर्वशत्रुविनाशनायसर्वदोषविनाशनायहनहनदहदहपचपचरक्षरक्षक्रांक्रीं
फट्स्वाहा।अस्यापि विदारणमंत्रवत्सर्वं।अथवीरनृसिंहमंत्रांतरंचतुर्नवतिवर्णात्मकं।ॐनमोभग
वतेवीरनृसिंहायज्वालामालिनेदीप्तदंष्ट्रायसर्वरक्षोघ्नायसर्वभूतविनाशनायसर्वव्याधिविनाशना
यसर्वदोषविनाशनायसर्वज्वरविनाशनायदहदहदहदहपचपचबंधबंधरक्षरक्षमांक्रूंफट्स्वाहा।
अस्यापिसर्वंपूर्ववत्।पुनरपिवीरनृसिंहमंत्रांतरंचतुर्दशोत्तरशतात्मकं।ॐनमोभगवतेवीरनृसिंहा
यज्वालामालिनेदीप्तदंष्ट्रायाग्निनेत्रायसर्वरक्षोघ्नायसर्वभूतविनाशनायसर्वव्याधिविनाशनाय
सर्वज्वरविनाशनायसर्वविषयविनाशनायहनहनदहदहपचपचबंधबंधरक्षरक्षमांमांमांक्रूंक्रूं
क्रूंफट्फट्स्वाहा।अस्यापिसर्वंपूर्ववत्।अथापराजितानृसिंहश्चतुरशीत्यक्षरः।ॐनमोभगवतेअ मंत्र
नंतायसहस्रशीर्षायक्षीरोदार्णवशायिनेशेषभोगपर्यंकशायिनेनमोगरुडवाहनायवासुदेवाय १२३
नमःपीतवाससेवासुदेवसंकर्षणप्रद्युम्नानिरुद्धहयशिरोवाराहनृसिंहवामनरामरामकृष्णवरप्र

दनमोस्तुते।असुरदैत्ययक्षराक्षसभूतप्रेतपिशाचसिद्धयोगिनीडाकिनीशाकिनीब्रह्मराक्षसविना
यकपूतनाग्रहस्कंदपुरोगग्रहान्नक्षत्रग्रहान्भूतग्रहान्प्रेतग्रहान्वेतालग्रहान्जंभकग्रहान्
वेतालांश्चहनहनदहदहपचपचमथमथमर्दमर्दछिंधिछिंधिविध्वंसयविध्वंसयवित्रासयवित्रासयस
क्रेणगदयावज्रेणभस्मीकुरुसर्वबाधासर्वग्रहहरणायुधजयजयविजयापराजिताप्रतिहतसहस्र
नेत्रज्वलज्वलप्रज्वलविश्वरूपमधुसूदनमहापुरुषनारायणपद्मनाभदामोदरहृषीकेशसर्वभू
तवशंकरशंखचक्रगदाधरसर्वरोगप्रमर्दनसर्वविषविनाशनसर्वसुराक्रंदनसर्वदेवमहेश्वर
सर्वमंत्रप्रभेदनसर्वभयविनाशनसर्वज्वरविनाशनसर्वदुःखप्रशमनसर्वरोगापमर्षणजनार्दन
देवदेववरप्रदनमोस्तुते।अस्यवामनऋषिःविराट्छंदःअपराजितानृसिंहोदेवताइष्टार्थेविनियो
गः।ह्रांह्रींइत्यादिषडंगं।ध्यानादिकंषडक्षरवत्।अथापराजितानारायणमंत्रः।ॐनमोभगवतेअ
नंतायसहस्रफणाशीर्षायक्षीरोदार्णवशायिनेनमोगरुडवाहनायवासुदेवायनमःपीतवाससेवासु

मरा

देवायसंकर्षणायप्रद्युम्नायानिरुद्धायहयशिरोवरायनृहरेवामनत्रिविक्रममत्स्यकूर्मरुक्मकल्कि
रामवरदजनार्दनदेवदेवनमोस्तुतेअसुरदैत्यदानवयक्षराक्षसभूतप्रेतपिशाचापस्मारकूष्मांडभि
रुद्योगिनीडाकिनीब्रह्मराक्षसभूतप्रेतवेतालग्रहान्स्मरग्रहान्प्रेतग्रहान्पिशाचग्रहान्बालकग्रहा
नेतानन्यांश्चग्रहान्हनहनदहदहमंदमंदपचपचमुंचमुंचगृह्णगृह्णरुरुवेधयवेधयविध्वंसयविध्वंसय
विद्रावयविद्रावयसर्वायुधचक्रायुधचक्रेणगदयाशंखेनशार्ङ्गेणवज्रेणसकलेनभस्मीकुरुभस्मी।
कुरुसर्वबाधोसर्वग्रहरणायुधायनमःजयजयविजयानंतायापराजितायअप्रतिहतसहस्रनेत्रज्व
लज्वलप्रज्वलितविश्वरूपमधुसूदनहृषीकेशमहापुरुषवैकुंठनारायणगोविंदपद्मनाभदामोदर
सर्वभूतवशंकरशंखचक्रगदाधरसर्वभूतनमस्कृतसर्वभूतप्रभंजनसर्वासुरोत्सादनसर्वदेवमहे मंत्र·
श्वरसर्वग्रहणनिवारणायुधसर्वमंत्रप्रभंजनसर्वव्याधिविनाशनसर्वमुद्राप्रभेदनसर्वज्वरविनाश २२४
नसर्वभूतापकर्षणसर्वबंधविमोक्षणसर्वदुःखविनाशनसर्वारिष्टप्रशमनसर्वशत्रुविनाशनसर्व

विषविनाशनसर्वदुःस्वप्नविनाशनसर्वविषनाशायनाशायसर्वदेवनमोस्तुते।अथअक्षरवत्।अथा
ष्टाक्षरोनृसिंहमंत्रः।ॐनमोनृसिंहाय।अस्यपंचाक्षरवत्सर्वं।अथपंचाक्षरः।क्ष्रौंनमःस्वाहा।अस्यब्रह्मा
ऋषिरनुष्टुप्छंदः।ह्रांह्रींइत्यादिषडंगं।पूजादिकंपूर्ववत्।अथलक्ष्मीनृसिंहस्याष्टाक्षरः।ह्रौंलक्ष्मीनृसिं
हाय।ऋष्यादिकंपूर्ववत्।अथकोपनृसिंहस्यैकादशाक्षरः।ॐक्ष्रौंकोपनृसिंहायस्वाहा।ऋष्यादिकंपूर्वव
त्।श्रीमत्स्यासनस्थेतिशेषं।ध्यानं।उग्रंध्यानमिदं।उद्यद्भास्वत्सहस्रप्रभनमशा।निनिमंतीक्ष्णंविक्षरंतेव
क्त्रीनक्रायविद्युन्नतिविततिसदानीयगोनृसिंहोव्याद्।दिव्यैराशीसदेहंनिशितनखलसत्काकुदंडैरनेकैः
संचारंनित्रेदेत्येस्थितततनुमतनुंनारसिंहंनमामि।अन्यत्सर्वंपूर्ववत्।अथतेजोनृसिंहः।द्विपंचाश
दक्षरः।ॐक्ष्रौंनृसिंहायनमस्तेजस्तेजसेआविर्भवआविर्भववज्रनखवज्रदंष्ट्रकर्माशयाबरुपररंधायनमो
ग्रायॐस्वाहा।अस्यऋष्यादिकंपूर्ववत्।कोगेदइत्यादिध्यानं।अथपातालनृसिंहःषोडशाक्षरः।ॐक्ष्रौंन
गवतेपातालनृसिंहायस्वाहा।अस्यब्रह्माऋषिर्गायत्रीछंदःपातालनृसिंहोदेवता।क्ष्रौंबीजंस्वाहाशक्तिः

इष्टार्थे विनियोगः। ध्यानं। त्रिभुजं शंखचक्राढ्यं सर्वाभरणभूषितं। कोटिसूर्यप्रतीकाशं दीप्तदंष्ट्राढ्यं लोकविभूषि
तं। अथ लक्ष्मीनृसिंहस्य मंत्रांतरं षडक्षरं। ॐ ईं हं क्ष्रौं हं ईं ॐ। अस्य ब्रह्मा ऋषिर्गायत्री छंदः प्रणवो बीजं
ईं शक्तिः। स्वस्थः पद्मासनस्थ इत्यादि ध्यानं। अथ पुच्छनृसिंहस्य त्रिंशदक्षरः। हरये विश्वत्रात्रे स्तौं नमो भ
गवते महापुच्छाय नृसिंहाय। अस्य ब्रह्मा ऋषिर्गायत्री छंदः षडक्षरवत् ध्यानादिकं। अथ स्वच्छनृसिं
हः पंचषष्ठ्यक्षरः। ॐ नमः श्रीनृसिंहाय प्रविगुणविभ्रमगुण रसदायषड्गुंतायुधकरालदंष्ट्रालोच
नगर्ग गर्ग मर्द मर्द ज्वालिनि ज्वालिनि ज्वालित देवदत्तलेखस्वस्थावेशां कुरु कुरु स्वाहा। नात्र ऋष्यादिकं। अ
नेन अनेकग्रहग्रस्तादीन् मुक्तं नयति। केचिदेकाक्षरं कथयंति। एकलक्षं पुरश्चरणं। एकभक्तो ऽधः
शयानो जितक्रोधा चारी यतिः स्यात्। ततः सिद्धिः। अथ मंत्रांतरं द्वादशाक्षरं। ॐ नमो भगवते नारसिंहाय। मंत्र· १२५
ऋष्यादिकं पूर्ववत्। अथ बालसिंहः। ॐ नमो भगवते नारसिंहाय देवनरदैत्यदुर्जिताय प्रदीप्तसहस्र
कोटिसमदीप्ततेजसे वज्रनखदंष्ट्रायुधाय स्फटिकविकटकीर्णकेसराय स्तुनितमहार्णवोनो विडु

डु डु निर्निर्घोषाय सर्वयंत्रांतरहृदयाय एह्येहि भगवन्नारसिंह पुरुष पुरुष चराचर ब्रह्मसत्येन स्फुर वि
जृंभ नयरयस्य सर्वपातालनेत्रं गर्जसुरसिंहायनादं विद्रावय अनिशाग्रह सर्वयंत्ररूपाणि श्वेंदन छिंद संछि
पद रहारयस्फोटय हुलालामा लासं घातानामय सर्वतो न नुक्षालाव ज्वाला निचक्रेण सर्वपातालमुन्मा
दय सर्वतो नंदवज्रद्वार जालेन सर्वपातालमुन्मादय सर्वतो न नुष्ठाला वज्रद्वार जालेन सर्वपातालान्नय
थय सर्वतो न नुष्ठाला वज्रद्वार पंजरेण सर्वपातालान् परिवारय सर्वलोकनिवासिनीनां हृदयाण्याकर्षय।
भ्रमन्निघ्रं दह दह पच पच शोषय शोषय निकृंतय तावत् यावद् दिलकन्यका वशमापन्ना पातालेषु त्वं
त्ररूपेण्यस्मवायुधेभ्यः सर्वतयोपद्रवेभ्यः ॐ ऐं क्लीं क्लीं फट्ट ई कारस्तुते हुं फट् स्वाहा। अस्य सिद्धमंत्रत्वात्
ऋष्यादिकं नास्ति। दशसहस्रं पुरश्चरणं। अयमेव परविद्याछेदनः। अथ षडक्षरः। श्रां श्रीं स्तौं क्रौं हुं फ
ट्। अस्य मंत्रस्य वामदेव ऋषिः पंक्तिश्छंदो नृसिंहो देवता स्तौं बीजं क्रीं शक्तिः इष्टार्थे विनियोगः। ॐ श्रां अंगु
ष्ठाभ्यां नमः। ॐ ईं तर्जनीभ्यां नमः। ॐ जं स्तौं मध्यमाभ्यां नमः। ॐ रं क्रौं अनामिकाभ्यां नमः। एतान्यक्षराणि हृद

यादिक्षु विन्यसेत्। अव्याज्जिजेति ध्यानं। पूजायंत्रं पूर्वोक्तमेव। किंतु षट्कोणमध्ये भुवनेश्वरी लेखनीयेति वि
शेषः। ततो वैष्णवपीठे देवमावाह्य पूजयेत्। अंगैः प्रथमावरणं। चक्रं शंखपाशौ अंकुशाक्षलिशागदाशूलपाण
खेटानि दलेषु पूजयेत्। लोकपालांश्चास्त्रदिक्षु। तदायुधानि च पूजयेत्। अक्षरलक्षं पुरश्चरणं। तावन्मद
त्रं घृताक्ताना मपामार्गसमिद्भिर्जुहुयात्। अथ सुदर्शननृसिंहस्य मदशाक्षरः। सहस्रारहुं। जावर्त्तिनि
ह्रौं हन दहन हुं फट् स्वाहा। अस्य मंत्रस्य अकुत्स ऋषिः जगती छंदः सुदर्शननृसिंहो देवता क्रों बीजं हुं शक्तिः
इष्टार्थे विनियोगः। चक्रराजाय स्वाहा। हृदयाय नमः। ज्वालाचक्राय शिरसे स्वाहा। महाचक्राय स्वाहा शि
खायै वषट्। जगच्चक्राय स्वाहा कवचाय हुं। असुरांतकचक्राय अस्त्रं। ध्यानं। चक्राब्जकर्णिकासीनं काला
ग्निसदृशप्रभं। दंष्ट्राग्रं च विहृत्यास्यं च त्र्यक्षं चक्रधरं हरिं। योगपट्टनिबद्धांगं त्रिनेत्रं योगविग्रहं। ध्यायेन्म
मस्तमूलं भ्रं अशोकद्रुममूलगं। एवं ध्यात्वा वैष्णवपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत्। आदा मंत्र
वंगावरणं। नृसिंहपरिवारं सुदर्शनपरिवारं वा अर्चयेत्। अथ सहस्राक्षरो नृसिंहमंत्रः। ॐ क्रौं श्रीं क्लीं ह्रौं १२६

क्ष्रौं भक्तेर्नृसिंह महापुरुष प्रधान धर्माधर्म निगड निर्मोचन कालपुरुष कालांतक विश्वेश्वर विश्वांतनि
विश्वचैतन्य चिन्मदा नामक कलव्यतीत नित्योदित अदयास्तमयोज्ज्वलतम महाकारुणिक हृदयाब्ज
हृदयान लिन निविष्ट चैतन्य एकात्मन् चतुरात्मन् द्वादशात्मन् चतुर्विंशात्मन् सहस्रमूर्त्ते एहि एहि भगव
न्नृसिंह पुरुष क्रोधेश्वर रमासहवंदित पादकल्याणाग्निसहस्रकोटि महादेव निकाय दशाशाज्ञान
बलत्रैय अमल अमल पिंगेक्षण सटोग्र दंष्ट्रायुध नखायुध दानवेंद्रांतकरण घोर नित्य संसक्त विग्र
ह नृत्यापस्मार याधान सुरासुर वंद्यमान पादपंकज अनंग वन व्योम चक्रेश्वर प्रनवाव्ययरूपेश नित्यनि
ष्कल विद्यानिचयं दह दह ज्ञानैश्वर्य प्रकाशाय प्रकाशाय ॐ सर्वजन अशेष जनाजन्नित ॐ सत्यपुरु
षसदसन्मध्य निविष्ट आमय स्तंभनयं निगडनयं कांतारनयं विषज्वर डाकिनी ब्रह्मराक्षस खेदिनीनयं
भ्रांतिनयं दुर्निमित्तनयं मारिनयं मारीचनयं छायास्कंदापस्मारनयं चोरनयं ज्वरमंत्राग्निनयं गजसिं
ह भुजंगनयं जनजरामरणादि सर्वनयं निर्मोचय प्रशामय प्रशामय तत्त्वरूप धारिन् नृसिंह हहहाम

दुरुपसर्वभयनिवारणाय अष्टाष्टकचतुःषष्टिवेष्टिकामयविद्याव्रतत्रयस्त्रिंशद्देवताकोटिनिमितपादपं
कजान्वितसहस्रवदनसहस्रोदरसहस्रेक्षणसहस्रपादभुजसहस्रजिह्वसहस्रललाटसहस्रायु
धसहस्रतमःप्रकाशकपुरमथनसर्वयंत्रराजेश्वरवेदायसगतिप्रदपातालगतिकरयंत्रमर्दनघो
राट्टहाससितविश्वावासवासुदेवचक्रक्रूरदयमुखरमाहंसविश्वेशविश्वविडंबननिविष्टप्रादुर्भावका
रकहृषीकेशस्वछंदप्रदनिःशेषजीवग्रासंकमहाशितासृग्जन्यपटखेचरीसिद्धिप्रदायकअजेयाव्या
याव्यक्तब्रह्मांडोदरब्रह्मसहस्रकोटिस्रककुंडमालामंडितमुंडमत्स्यकूर्मवराहनृसिंहवामनत्रैलो
क्याक्रमणपादशालिकरामत्रयविष्णुरूपधरएकतत्त्वप्रणवाधारशिखानिविष्टस्वाहास्वधावषट्वौष
ट्ॐफट्प्राणाधारत्र्यादिदेवप्राणापाननिविष्टपांचरात्रिकदितिजनिधनकरमहामायअमोघदर्पदैत्यें मंत्र
द्रदर्पदलनतेजोराशेॐक्रोंतेतेजेश्वरपुरषट्ॐसंसत्यपुरुषफट्ॐधांअच्युतफट्ॐवांवासुदेवफ १२७
ट्ॐक्ष्रींनृत्र्येफट्ॐउग्रमूर्तेफट्ॐह्रींविश्वमूर्तेफट्ॐक्ष्रांविश्वात्मनेफट्ॐसौंचतुरात्मनेफट्ॐक्ष्रौंनृसिं

फट् हरूपधारिणेॐक्रोंअष्टांगंविन्यासविन्यस्तमूर्द्धधारिणेफट्ॐह्रौंनिसर्गसिद्धैकरूपधारिणेफट्ॐक्ष्रूं
क्ष्रूंसंकंखंअस्त्रकमस्तकंखादिखादिखादयखादयकंक्रोंसाध्यमानयानयमहात्मनृसम्यक्दर्शय
दर्शयस्वाहाह्रींह्रूंह्रैंह्रौंह्रःउच्छितकल्पसर्वउत्तारयउत्तारयक्ष्रांक्ष्रींक्ष्रींक्रंसःनृसिंहक्ष्मासात्मनेस्वा
हानृसिंहक्ष्माप्तनाग्नयेस्वाहाह्रौंक्ष्रींश्रींक्ष्रींॐ॥अस्यश्रीनृसिंहसहस्राक्षरमंत्रस्यकपिलमहर्षिऋषिः
जगतीछंदः।श्रीलक्ष्मीनृसिंहोदेवता।क्ष्रौंबीजं।स्वाहाशक्तिः।श्वेतोवर्णः।उदात्तःस्वरः।परमात्माने
त्रं।श्रीनृसिंहप्रीतयेविनियोगः॥ॐक्ष्रंसहस्रबाहवेसहस्रायुधधारकायसिंहायस्वाहाअस्त्रायफट्इति
करशुद्धिविन्यासायअंगुलीषुहृदयादिषुचन्यासः॥ॐक्ष्रांतसहस्राक्षराविजंनितनृसिंहायस्वाहाहृदयायन
मः।ॐक्ष्रींमहाप्रसन्नविकटनृसिंहायस्वाहाशिरसेस्वाहा।ॐक्ष्रूंतप्तहाटककेशांतज्वलत्पादिपविलासमहाधूनि
धजजगद्रूपायनृसिंहायस्वाहाशिखायैवषट्।ॐक्ष्रैंसुवर्णमिदससिक्ष्मालितनृसिंहायस्वाहाकवचाय
हुं।ॐक्ष्रौंसहस्राक्षरविग्रहरूपधारिणेस्वाहानेत्रत्रयायवौषट्।इतिविन्यासषडंगंव्यापकं।प्राणायाम

त्र्यंबत्वा हृदयेन्नृसिंहं ध्यायेत। ध्यानं। उद्यद्भास्वत्समदस्य प्रभमथानिनिमंत्री चरणोविस्तरं तं वज्जीनन्वाय
विद्युत्प्रतिवितति सदा नीपसेणेनृ षणेश्व। दिव्यैरादीप्तदेहं निशितनखलसद्भाक्रदंडैरनेकैः संघातंनि
लैदैत्यैः स्थितितनुमतनुं नारसिंहं नजामि। २३ ग्रंध्यानमिदं। द्विभुजं शंखचक्राद्यं सर्वाभरणभूषितं। को
टिसूर्यप्रतीकाशं सद्दंष्ट्राकालाविन्नषितं। २ वक्षःस्थकर्णिकासीनं कालाग्निसदृशप्रभं। बृहत्ख्यवंविष्णुास्य
चक्रस्कंधरं हरिं। ३ योगपट्टनिबद्धांगं त्रिनेत्रं योगविग्रहं। ध्यायेत्समस्तमृत्युघ्नं चक्रशोकद्रुममूलगं। ४।
इतिध्यात्वा वैष्णवपीठे देवमावाह्य पाद्यादिभिरुपचारैः पूजयेत। आदावंगावरणं। नृसिंहपरिवारं सुदर्श
नं चार्चयेत। पूर्वोक्तं शजादिकं कुर्यात्। ततो जपित्वा मंत्रं देवे निवेद्य विसर्जयेत। अस्य मंत्रस्य जपात्सर्वं समी
हितं प्राप्नोतीत्यर्थः। नात्र विचारणा। इति नृसिंहमंत्राः षड्विंशतिसंख्याकाः। उक्ताः ग्रन्थे पि बहवो नृसिं मंत्र·
हमंत्राः सन्ति ते सर्वे ग्रंथगौरवान्न लिखिताः। मंत्रा नरहरेः श्रेष्ठा उक्ताः संक्षेपतः शुभाः। सर्वसौख्यप्रदा २२८
दिव्याः सर्वकामप्रदायकाः। १ ग्रहभूतादिकूष्मांडडाकिनीयक्षराक्षसा। प्रेतवेतालपिशाचानां नाममा

त्राणयापहाः। २ सर्वशत्रुहराश्शीघ्रं वश्याकर्षणकारकाः। सर्वव्याधिहराः नॄणां मोहध्वांतविनाशनाः।
सर्वाभीष्टप्रदातारश्चिद्विद्योत्पातनाशनाः। धर्मार्थदा महापुण्या महालक्ष्मीप्रदायकाः। ४ भुक्तिमु
क्तिप्रदा दिव्याः परं निर्वाणदायकाः। विष्णुसांनिध्यदा मंत्रा योगिनामपि दुर्लभाः। ५ एषां पुण्यं फलं सर्वं
वक्तुं विधाननशक्नुयात्। प्राणिनां दुःखतप्तानां दुःखशांतिकराः शुभाः। ६ उक्ता मंत्रा महावीर्या भुक्तिमु
क्तिप्रदायकाः। ये जपंति मनुजा मंत्रान्नृसिंहस्य यथाविधि। ७ न किंचिद्दुर्लभं तेषां इहलोके परत्र च। आरत्याश्च
वपन्नायाग णेशस्य रवेस्तु वा। ८ शिवस्य जगदंबायाः केशवस्य बहून्मनून्। ये ध्यायंति नरास्तेषां भुक्ति
मुक्ती न दूरतः। ९ इति श्रीमदागमादित्यत्रिपाठिसंगृहीते मंत्रकोशे नृसिंहमंत्रकथनं नाम षोडशः परि
च्छेदः॥ ॥ अथ पंचायतनमंत्रकथनानंतरं नानामंत्राः कथ्यंते। तत्रादौ गायत्रीविधानं लिख्यते। अथो
वदामि गायत्रीं तत्स्वरूपां त्रयीमयीं। यया प्रकाश्यते ब्रह्म सच्चिदानंदलक्षणं। १ गयाः प्राणा इति प्रोक्ता गा
यनं त्राणनं जपः। गायंतं त्रायते यस्माद्गायत्री तेन सा स्मृता। २ प्रणवं पूर्वमुच्चार्य भूर्भुवःस्वस्तथैव च॥

गायत्री प्रणवश्चांते जपएष उदाहृतः एषा जप्ता महापुण्या चतुर्वर्गप्रदायिनी ॥ ॐ प्रणवस्य ब्रह्मा ऋषिर्दे
वी गायत्री छंदः परमात्मा देवता । व्याहृतीनां तिसृणां समस्तेन प्रजापतिऋषिः एकैकस्या गोतमभरद्वा
ज विश्वामित्रा ऋषयः । गायत्र्युष्णिगनुष्टुप् छंदांसि । अग्निवाय्वादित्या देवता । वरेण्यमिति पदे रमिति श
क्तिः यमिति बीजं । णकारस्याधारणशक्तिः । एकारो बलमिति श्रुतेः ॥ अथ पदन्यासः ॥ ॐ तत्पदात्मनेनमः ।
सवितुर्जंघात्मनेनमः । वरेण्यं गुह्यात्मनेनमः । ॐ भर्गो नाभ्यात्मनेनमः । ॐ देवस्य हृदयात्मनेनमः । ॐ धीमहि
कंठात्मनेनमः ॥ धियः सर्वमुखात्मनेनमः । यः चक्षुरात्मनेनमः । ॐ नः भ्रूमध्यात्मनेनमः । ॐ प्रचोदयात् मूर्ध
त्मनेनमः ॥ ॐ तत्सहस्रलिनेनमः ॥ ॐ सवितुर्भ्रूमध्यात्मने । ॐ वरेण्यं चक्षुरात्मने । ॐ भर्गो विकात्मने । ॐ देवस्य
कंठात्मने । ॐ धीमहि हृदयात्मने । ॐ धियः नाभ्यात्मने । यः गुह्यात्मने । ॐ नः जान्वात्मने । ॐ प्रचोदयात् पादा मत्र
त्मने ॥ पुनः ॐ तत् गुह्यात्मनेनमः । ॐ सवितुः चक्षुरात्मने । ॐ वरेण्यं पादात्मने । ॐ भर्गो कंठात्मने । ॐ देवस्य हृद २२९
यात्मने । धीमहि ज्वालात्मने । ॐ धियः नक्षात्मने । यो ललाटे । ॐ नः घ्राणात्मने । ॐ प्रचोदयात् मूर्ध्नि नमः ॥ पु

नः ॥ अत्र तत्स सवितुर्वरेण्यं भूरग्नये पृथिव्यै ब्रह्मणे लोकत्रयात्मनेनमः । ॐ भुवः भर्गो देवस्य धीमहि भुवोंत
रिक्षाय वायवे वेदत्रयात्मनेनमः । ॐ स्वः धियो यो नः प्रचोदयात् स्वरादित्याय दिवे महेश्वराय प्राणत्र
यात्मनेनमः । पादहृदयशिरस्सु पदन्यासः ॥ अथ मंत्रशक्तिकारविन्यासः ॥ ॐ तत् प्रज्ञादिन्यै चंपककनि
भायैनमः । ॐ स प्रद्युम्नायै श्वेतवर्णायैनमः । ॐ विनतायै पिंगलवर्णायैनमः । ॐ तुः विश्वमंत्रायै इंद्रनील
प्रभायैनमः । ॐ व विलासिन्यै वह्निदीप्तायैनमः । रे प्रभावत्यै वह्निरूपायैनमः । ॐ णि जयायै विद्युत्प्र
भायैनमः । ॐ ण्यं शांतायै रक्तवर्णायैनमः । ॐ भर्ग कांतायै जलदवर्णायैनमः । ॐ गो दुर्गायै रक्तगौर
निभायैनमः । ॐ दे सरस्वत्यै मरकतनिभायैनमः । ॐ व विश्वरूपायै नानावर्णायैनमः । ॐ स्य विशालायै
स्वर्णप्रभायैनमः । ॐ धी ईशायै कुंदप्रभायैनमः । ॐ म वापिन्यै पद्मरागनिभायैनमः । हि विमलायै
शंखनिभायैनमः । ॐ धि तमोपहारिण्यै पांडुरप्रभायैनमः । ॐ यो सूक्ष्मायै इंद्रगोपनिभायैनमः । ॐ
यो विश्वयोन्यै कुंकुमप्रभायैनमः । ॐ नः जयावहायै सूर्याभदनिभायैनमः । ॐ प्रलयायै नीलोत्पल

निभायेनमः॥ चो प्रद्यरायै गोरोचननिभायेनमः॥ ॐ दक्षोनायै कुंदेंदुधवलायेनमः॥ ॐ यातनदरूयिस्येस्फ
टिकनिभायेनमः॥ ॐ ततद्भ्र प्रयेपंकनिभायपद्मासनस्थाय ब्रह्मविष्णुशिवात्मनेनमः॥ ॐ सप्रजापतये
श्यामवर्णायपद्मासनायु॥ ॐ विसोमायपिंगलनिभायपद्मासनस्थाय ब्रह्मविष्णुशिवात्मनेनमः॥ ॐ तुई
शानाय इंद्रनीलनिभायप०॥ ॐ वश्रादित्यायवह्निदीप्तायप०॥ ॐ तुबृहस्पतयेवह्निस्वरूपायप०॥ ॐ लिंडे
न्द्रायविद्रुमाभायप०॥ ॐ यंनर्गदेवायरक्तवर्णायप०॥ ॐ देवद्रुमरकतनिभायप०॥ ॐ धीवाय
वेकुंदप्रभायप०॥ ॐ वश्लेशुक्लवर्णायप०॥ ॐ स्यइंद्राग्नीभ्यां सुवर्णप्रभाभ्यांपद्मासनारूढाभ्यां ब्रह्म
विष्णुशिवात्मभ्यांनमः॥ ॐ धीवयवेकुंदप्रभायप०॥ ॐ मवामदेवायपद्मरागनिभायप०॥ ॐ हिमित्राव
रुणाभ्यांशंखनिभाभ्यांपद्मासनाभ्यां०॥ ॐ धिविश्वाष्टदेवायपांडुरप्रभायपद्मासनारूढाय॥ यो विश्वेभ्यो दे मंत्र
वेभ्यः इंद्रगोपनिभेभ्यः पद्मासनारूढेभ्यः ब्रह्मविष्णुशिवात्मकेभ्योनमः॥ यो विश्वेवेकुंकुमनिभायपद्मा १३०
सनारूढाय०॥ ॐ नः वसुभ्यः सूर्योदयनिभेभ्यः पद्मासनारूढेभ्यः॥ ॐ प्रपितृभ्यो नीलोत्पलनिभेभ्यो०॥

ॐ चोकुबेरायगोरोचननिभायपद्मा०॥ ॐ दक्षश्विभ्यांकुंदेंदुरवेशेंनिभाभ्यांपद्मासनारूढाभ्यांब्रह्मवि
ष्णुशिवात्मभ्यांनमः॥ ॐ यात ब्रह्मणेस्फटिकनिभायपद्मासनारूढाय ब्रह्मविष्णुशिवात्मनेनमः॥ ॐ
ततक्षत्रयेपृथिव्यात्मनेनमः॥ ॐ सप्रजापतयेत्रंबात्मने॥ ॐ विश्वसोमवरुणात्मने॥ ॐ तुः ईशानायवाता
त्मने॥ ॐ वश्रादित्यायआकाशात्मने॥ ॐ रिबृहस्पतयेगंधतन्मात्रात्मने॥ ॐ नत्र्यर्यम्णेस्पर्शतन्मात्रात्मने॥
ॐ र्गोसवित्रेशब्दतन्मात्रात्मने॥ ॐ देत्वष्ट्रेउपस्थात्मने॥ ॐ वृश्लेवाय्वात्मने॥ ॐ स्यइंद्राग्निभ्यांपादद्व
यात्मभ्यां॥ ॐ धीवायवेप्राणात्मने॥ ॐ मवामदेवायवागात्मने॥ ॐ हिमित्रावरुणाभ्यांघ्राणात्मभ्यां॥ ॐ धिविश्वा
ष्टदेवायजिह्वात्मने॥ ॐ यो विश्वेभ्योदेवेभ्यश्चक्षुरात्मभ्यः॥ ॐ यो विश्वेवेत्वगात्मने॥ ॐ नः वसुभ्यःश्रो
त्रात्मभ्यः॥ ॐ प्रपितृभ्यो मानसात्मभ्यः॥ ॐ चोकुबेरायबुध्यात्मने॥ ॐ दक्षश्विभ्यांअहंकारात्मभ्यां॥ ॐ यात
ब्रह्मणेऽव्यक्तात्मनेनमः॥ ॐ ततहृदयायनमः॥ ॐ सविद्वःशिरसेस्वाहा॥ ॐ वरेण्यंशिखायैवौषट्॥ ॐ न
र्गोकवचायहुं॥ ॐ देवस्यनेत्रत्रयायवौषट्॥ ॐ धीमहिअस्त्रायफट्॥ ॐ धियोयोनःपार्श्वभ्यांनमः॥ ॐ प्र

चोदयात हस्ताभ्यांनमः।भुवः।ॐतत्सवितुर्ब्रह्मणेस्वहृदयायनमः।ॐवरेण्यंविष्णवेशिरसेस्वाहा।ॐभ
र्गोदेवस्यरुद्रायशिखायैवषट्।ॐधीमहिईश्वरायकवचायहुं।ॐधियोयोनःसदाशिवात्मनेनेत्रत्रयाय
वौषट्।ॐप्रचोदयात्अस्त्रायफट्।ततोऽक्षरशक्तिन्यासः।ॐततत्तयायै।ॐससमग्रायै।विविमलायै।
ॐतुःतुष्ट्यै।ॐववंद्यायै।ॐदेदेविन्यै।ॐववरदायै।ॐस्यस्यंदनायै।ॐधीधीरायै।ॐममधुरायै।ॐहिहिम
वत्सुतायै।ॐधिधृत्यै।ॐयोयोगिन्यै।योयोगदायै।ॐनःनर्मदायै।ॐप्रप्रमथप्रियायै।ॐचोचोरिण्यै।ॐद
दयायै।ॐयातयाज्येनमः।स्थानानि।पादसंधिचतुष्कांडेनाभिहृत्स्तनयोर्द्वयोः।मस्तकास्यनासागंडा।
क्षिकर्णस्त्रमध्यकेष्वपि।२४।वारुणेदवयस्याधमूर्द्धगेषुमुखेषुच।क्रमेणमंत्रांश्चिन्यसेतगायत्र्यामंत्र
वित्तमः।२५।इतिन्यासानंतरंध्यानंसंध्यात्रयेकार्यं।२६।प्रातःब्रह्मदैवत्यांरक्तवर्णांपीतांबरधरांसर्वाभर
णभूषितांचतुर्भुजांशंखचक्रवरदाभयधारिणींचतुर्मुखांहंसाधिरूढांगायत्रींध्यायेत।मध्याह्नेविष्णु
दैवत्यांशुक्लवर्णांपीतांबरधरांसर्वाभरणभूषितांकमंडलुअक्षमालावरदाभयधारिणींगरुडारूढांसा

मंत्र॰ १३२

वित्रीं ध्यायेत।अपराह्णेरुद्रदैवत्यांश्वेतवर्णांश्वेतवस्त्रांसर्वाभरणभूषितांचतुर्भुजांशूलकपाल
वरदाभयकरांवृषारूढांसरस्वतीं ध्यायेत।संध्यात्रयध्यानंअन्यागमोक्तं।तत्रामंत्रदेवताप्रका
शकोक्तंहंसारूढांसिताब्जेत्वरुणिमणिलसद्भूषणांमाणिनेत्रांवेदाख्यामक्षमालामृचयममल
दंडमप्पादधानां ध्यायेदानिश्चितुर्निखिलभुवनजननींसर्वमेधादिवंद्यांगायत्रीरूकसवित्रीम
निनववयसमंडलेचंद्ररस्थमेनः।२८।तार्क्ष्यारूढांबुजाक्षीदरितमणिनिभांशंखचक्रेदधानांदोर्भ्यांरि
जहृदाऽसेजगदवनपरायायनंष्कफिरंती।आलोलानेकहासस्फुतिरुचिरुचितावेस्लवीमध्य
मेऽकः।मावित्रीध्येयरूपाविलसमतुमविद्युमंडलेपीतवस्त्रा।२९।पंचास्यांपिंगविद्युत्प्रपवरेदंतिरुचिर
जटामंडलींचंद्रमौलिंगिराजद्भुषाभुजंगमुकुटमणिविलसद्भस्मरागादिसंध्यां।ध्यायेत्षड्भांगशूलाभ
यवरदकरांव्याघ्रचर्माबिराढ्यांअस्तांसारसतारखांपरिणितवयसंमामस्तकंदधानां।३०।अन्यदाते
नें।मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्वात्मवर्णात्मिकां।गा

३ए

यंत्री वरदाभयांकुशकरां पाशं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजेत्॥ ३ कश्चिदेवं
ध्यानमध्ये प्रवर्तितमिदं व्याख्यानं। एवं त्रिकालध्यानं कार्यं। अथ पुराणोक्त त्रिकालध्यानं। प्रातःसंध्यां
कुमारीमरुणनिवसनामेणचर्मोत्तरीयामृग्वेदोऽंगसंगामतिशशजवरामीषदुद्यत्कुचाग्रां। दोर्भिर्दंडा
क्षसूत्रारुणकमलजलापूर्णपात्रं दधानां हंसासीनां प्रसन्नां तरुणरविरुचिं ब्रह्मशक्तिं स्मरामि। १ पी
नोत्तुंगपयोधरां त्रिनयनां शुक्लां वरालेपनां गौरांगीं वृषवाहनां सुतरुणीं ताम्बूलपूर्णाननां। शूलं दंडम
थाक्षदाम दधतीं शुभ्रां बुजं पाणिभिः संध्यामंकतलेयजुःश्रुतिधरां ध्यायामि मध्यंदिनीं। २ सायं संध्यां सु
कृष्णामसितवरतनुं सामवेदं दधानां भुजंगे पाणिपद्मैः पृथगपि दधतीं शंखचक्रे गदाब्जे। आसीनां वैन
तेयोपरि परिविलसत्पीतकौशेयवस्त्रां विष्णोः शक्तिं विमुक्तिंफलमभिदधतीं मातरं संस्मरामि। ३ अ मंत्र·
थागमोक्तं यथोक्तं एवं ध्यात्वा तीव्रादिशक्तिसहितां सौरपीठे त्रिकोणमध्ये देवीमावाह्य मुद्राः प्रदर्श १३२
येत्। मुद्रा यथा उच्यते। कलं त्रिशूलं संमुखं संपुटं विस्तृतं एकमुखं द्विमुखं त्रिमुखं चतुर्मुखं पंचमु

खं षण्मुखं विलिंगितं शकटं पाशं ग्रंथितं यमपाशं ग्रथितं विमुखमधोमुखं प्रलंबमुष्टिं मीनाक्रांतं कूर्मा
क्रांतं वराहाक्रांतं सिंहाक्रांतं प्रलंबमुद्गरं। एता मुद्राश्चतुर्विंशगायत्रीसुप्रसाधिता। हृष्या मंत्रजपा
र्थे च स्नानं भोजनमेव वा। तथा तु तीर्थयात्रा च मुद्रादीनां वृथा हि सा। यस्त्वज्ञो निष्फलस्तेषां होमो देवा
र्चनं तथा। तस्मात्तु मुद्राः सदा ज्ञेया विद्वद्भिर्यत्नमास्थितैः। ४ एताः मुद्राः प्रदर्श्य पाद्यादिभिरुपचारैर्देवीं
गायत्रीं पूजयेत्। गायत्र्यै नमः सावित्र्यै नमः सरस्वत्यै नमः इति त्रिषु कोणेषु। ब्रह्मणे विष्णवे महेश्वरा
य। तद्बहिः उषायै। प्रज्ञायै। प्रभायै। कांत्यै इति चतुर्दिक्षु। ततो गावरणं। प्रकृ दिव्यै। प्रभायै। विश्वंभरा
यै। विद्यामित्र्यै। प्रभानुत्यै। जयायै। शांतायै। कांतायै। दुर्गायै। सरस्वत्यै। विद्यायै। विश्वायै। ईशाना
यै। व्यापिन्यै। विमलायै। तमोपहारिण्यै। सूक्ष्मायै। विश्वयोन्यै। जयावहायै। पद्मालयायै। परायै। शोभ
नायै। भद्ररूपायै नमः इत्यावरणत्रयं। कमलपत्राष्टकेषु पूजयेत्। ततो ब्रह्माद्याः। ततो नवग्रहाः
आदित्यापरिवाराय नमः इति। ततो लोकपालाः पूज्याः। अष्टोत्तरशतं चाष्टाविंशति वा जपित्वा। उत्त

रेशिखरे इति विसर्जयेत्॥ चतुर्विंशतिलक्षजपः॥ चतुर्विंशतिसहस्रं शुद्धे स्तिलैर्होमः॥ पायसघृतति
लदूर्वाहुतद्रुमसमिधः पृथक्॥ २॥ त्रिसहस्रं जुहुयात्॥ तेन गायत्री सिद्धा भवति॥ तद्दशसहस्रा
णि मंत्रविज्जुहुयात्तिलैः॥ सर्वपापविनिर्मुक्तो दीर्घमायुः स विंदति॥ ३॥ आयुष्यमाज्यहविषा केवले
नाथ सर्पिषा॥ ४॥ दूर्वात्रिकैस्तिलैर्मंत्री जुहुयात्त्रिसहस्रकं॥ ५॥ अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतं प्रनः॥
महालक्ष्मीर्भवेत्तस्य षण्मासान्नात्र संशयः॥ ६॥ त्रिमधु घृतशर्करा मधूनीत्यर्थः॥ ब्रह्मश्रिये घृतं जुहुयात्स्व
स्तने ब्रह्मलक्ष्मजेः॥ अथ साधनप्रकाराः॥ अष्टम्यादिदाने विशुद्धदेहो लक्षाणि जप्त्वा त्रिगुणीकृतानि॥
सतारकां व्याहृतिकोत्तमां गां मंदेवतां छंद ऋषिप्रयुक्तं॥ १॥ स्नात्वा च सम्यक् सवनत्रयेषु मिता मंत्र॰
शनः संयतमानसाङ्गः॥ २॥ हविष्यभुग्गोमयवङ्रणवज्ञौ तदीनरं कर्मसमारभेत॥ ३॥ जपेद्धुतो द्वादश १३३
वासरेषु दिने दिने गव्यघृताहुतीनां॥ कृत्वा सहस्रं खदिरेध्मवह्नौ सहस्रनिष्कं लभते द्विजेन्द्रो॥ नायै
॥ ४॥ हुता निषेकः सवनत्रिकेषु जपन् त्रिसंध्यं त्रसहस्रसंख्यं॥ मासेन तुष्टेन स देवताभिष द्वि

षु मासेरपमृत्युवर्जितः॥ अध जलं जलांतर्गतसूर्यबिंबे शतं सहस्रं चुलुकेन कृत्वा॥ शतं सहस्रं कन
कस्य लाभो रूप्यस्य लाभो नवनीतबिंबे॥ ५॥ पत्राणि स्वस्य यदि मंजुलस्य मध्वाज्यलिप्तानि हुतानि
वह्नौ मिषस्तदा कर्षति सर्वसौम्यो निवारयेदत्र सितस्महोमः॥ ६॥ समानवत्सा कपिलाघृतेन जप्त्वा
सहस्रं धवलोग्रगंधा॥ उपास्य चेदग्रहणेनियीयमे धामवा भोतिजडोपि सद्यः॥ ७॥ ततः समप्राप्य शत
तोयये गाऽक्षीवेक्ष सहस्रं परिवत्सराणां॥ नादे न कांचिद्विपदं सबुध्या द्रक्षायुरन्यानि वसेद्विवेदः॥ ८
पलाशहोमाच्च भवेत्तनिधानं घृतेन तेजोबलपुष्टिकामं॥ दूर्वाभिरायुः पयसा तथा गाः श्रामंतिलेन सु
रतं कुलेस्य॥ ९॥ वत्सेण मधुक्षीरघृताहुतीनां नवेदवश्यं नृपतिः स वश्यः॥ अकारणाद्वायदिकारणाद्वा
कुर्वंतिपीडां यदि शत्रुसंघाः॥ १०॥ तेषामिदं कर्मनरासुराणां विद्वेषणोच्चाटनमारणानि॥ निंबांतरे
काककृलायकाष्ठमादाय मातंगगृहीतमार्गं॥ ११॥ चंडालहस्ते घृतदीपिकाग्नौ जुहुयात्छतं प्रस्फु
रितं प्रकोपः॥ नैबंदलं वामस मिश्रयमेन बीजं सराजिकातैलविमिश्रितांगैः॥ १२॥ विलोमपादेन मसंजुहते

नविदर्न्यशत्रोरग्निधानवस्मानि । त्वंष्टोमदस्माणि जुहोति यस्य स दुर्मगः सर्वजनेष्वपनेष्टः ॥ २३ ॥ अथ वारपारा
ऋरितो मृदश्वरूलाउ पुंसः प्रतिमामरातेः । नामाक्षरैरंकितदक्षत्प्रदेशां सराजिकातैलविलेपितांगीः ॥ २४
न्यस्ता घृणा तैलविमिश्रितेन प्रत्यक्षवच्छत्रुतनुं प्रविश्य । तीक्ष्णाननेर्मर्दनकंटकैश्च चतुःपथे वै निख
नेदद्दृष्टः । २५ पादेन विद्धः स भवेत्तु षंजो नानिंप्रवेशो ह्यदिकुक्षिस्थलेंग लग्नदृश्चापि गलप्रदेशे कोप्सा
तरे दारुणकर्णशूलं । २६ ललाटदेशोपि हि मुंडशूलं नेत्रेक्षिरोगं हृदये विनाशः । एवं समस्तैरपि वा हि
दुष्टानयेपुरु शांतिगदानिरूताः । २७ एवं ह्यनेकप्रकाराः संति । ते ग्रंथगौरवभयान्न लिखिताः ॥ ना
ग्निहोत्रात्परो धर्मो न देवः केशवात्परः । न गायत्र्याः परं जाप्यं त्रिलोकेषु विद्यते । १ गायत्री परमा देवी
सर्वकामप्रदायिनी । भुक्तिमुक्तिप्रदा दिव्या जपतां सर्वदेहिनां । २ इति गायत्रीध्यानं ॥ ॥ अथ वैदिकाः मंत्र
केचिन्मंत्रा उच्यंते । अथ जातवेदो दुर्गामंत्रः । जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स २३४
नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः । १ अस्य मंत्रस्य मरीचिपुत्रः काश्यप ऋषिरनुष्टु

प् छंदः जातवेदोरूपिणी दुर्गा देवता दुं बीजं अग्निः शक्तिः रं कीलकं शत्रुनिग्रहादौ विनियोगः । जात
वेदसे सुनवाम हृदयाय नमः । सोममरातीयतो शिरसे स्वाहा । निदहाति वेदः शिखायै वषट् । स नः
पर्षदति कवचाय हुं । दुर्गाणि विश्वा नावेव नेत्रत्रयाय वौषट् । सिंधुं दुरितात्यग्निः अस्त्राय फट् ॥
अंगुष्ठगुल्फजंघाजानूरुकटिगुह्यनाभिहृदयस्तनपार्श्वद्वयपृष्ठस्कंधमध्य । बाहुमूलोपबाहुकोर्परि
कर्णयुगोष्ठरसना कंठबाहुहस्तकुक्षिकटिगुह्योरुजानुजंघाचरेषु पदन्यासः । ध्यानं । विद्युद्दामस
मप्रभां मृगपतिस्कंधस्थितां भीषणां कन्या निःकरवालखेटविलसद्धस्ताभिरासेवितां । हस्तैश्चक्रदरासि
खेटविशिखांश्चापं वरं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां स्मरेत् । १ दक्षिणवामोर्ध्वक
रयोः चक्रगदे तदधो । सिखेटौ तदधो बाणचापे तदधो वरतर्जनी ॥ इति ध्यात्वा दोर्गपीठे च अष्टदलक
मलकर्णिकायां जयादि मदितां जया विजया नंदा नंदका स्वीसु मुखी दुर्मुखी व्याघ्रमुखी एता जया
द्याः तत्र षट्कोणे देवीमावाह्य संपूजयेत् । अंगैः प्रथमावरणं । अन्याः शक्तयो गौरवान्नोक्ताः । पृथिव्या
ॐ अग्नये जातवेदसे नमः । अग्नये सप्तजिह्वाय । अग्नये विश्वमुखाय । अग्नये वैश्वानराय । नम इति द्विजो ब्रह्म जयेत ॥ ४२ ॥

त्मने।वाय्वात्मनेनमइति।निवृत्त्यै।प्रतिष्ठायै।विद्यायै।शांत्यैनमइतिकोणेषु।एवंसंजयित्वाविसर्ज
येत्।चत्वारिंशत्सहस्रं पुरश्चरणं।क्षीरवृक्षतिलराजीद्रविर्निर्होमः।प्रयोगाः।अस्यप्रकारेणलेख्याः
त्र्यंबकमंत्रस्तुपूर्वमेवोक्तः।अथमातासरीमंत्रः।ॐभूर्भुवःस्वःगायत्रीतदनुजातवेदसे०तदनुत्र्यंब
कं०तदनुभूर्भुवःस्वःॐइतिशतास्तरीस्त्र्यर्यवह्निसोमात्मका।ऋष्यादयःपूर्वोक्ताःएवाॐभूर्भुवःस्वः
तत्सवितुर्वरेण्यंतर्गोदेवधीमहीतिहृदयं।धियोयोनःप्रचोदयात्शिरः।जातवेदसेसुनवामसो
ममरातीयतोनिदहातिवेदःशिखा।सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितान्यग्निःकवचं।
त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनंनेत्रं।उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्भूर्भुवःस्वरों
अस्त्रं।ध्यानंपूर्वोक्तं।अथवागायत्रीवर्णपरित्यक्तंतत्त्वावगमार्थंक्लिष्टत्वविशिष्टमहितन्नतांतःशि
खा।अनुनासिकरंसमयरुचिःशांकोदधुःसमुद्यतसमीपविश।जितंवः।अथवा।समस्तव्याखिलत्रै
कवार्त्तमतंयत्जंगमस्थावरंव्यासंयेनचयत्सपंचरहितंमुक्तैश्वर्यसिद्धिदं।यशस्यात्स्तणवप्रने

दगाहनंस्रुत्वावयस्मीयते।तद्वत्कांक्षितसिद्धयेउपरमंज्योतिःसमुत्थंमहः।इतिध्यात्वासौर
पीठेदेवमावाह्यपूजयेत्।अंगैःप्रथमावरणं।गायत्रीयुक्तानिःषट्समसांगमं।चतुष्टयंलोक
पालैर्नवमंदशमंपूजयतोजपतःसिद्धिर्नवति।विशेषतोजपतस्यमुक्तिर्भवति।लक्षंपुरश्चरणं।
तिलैर्दशांशोहोमः।उक्तंतथा।प्रणवव्याहृत्याद्याव्याहृतारांतिकाचमंत्रिवरैःजप्याशतास्तरीस्या
दहपरलोकप्रसिद्धयेदिनशः।श्मनमथरिपुशांत्यैश्रेयसेतत्सजप्याहृदगणरहितायाप्यायुषेतु
ष्टुवाद्यं।विमलमतिरराति।ध्वंसनेत्रिष्टुवाद्यंदिनमस्तुदिनवक्रेवत्सरंसंयतात्मा।शतासुरामिनो
रयंक्रमउदाहृतः।मंग्रहाक्नजेदमुंमहतेदिनशाइहमंत्रीस्वरहत्रनीष्टफलसिद्धयेवयशसेसुदी
र्घायुषेऽप्यशेषजननिरंजनायचिरमिदिशावाप्रयो।अथयजुर्वेददुर्गा।तामग्निवर्णांतिपसाज्वलं
तींवैरोचनीकर्मफलेषुजुष्टां।दुर्गांदेवींशरणमहंप्रपद्येसुरतरसितरसेनमः।अस्यऋष्यादिकंमा
त्रिःॐतामग्निवर्णांनिमःहृदयं।ॐतपसाज्वलंतींनमःशिरः।ॐवैरोचनीकर्मफलेषुजुष्टांनमःशि

खां। ॐगर्दिन्यै नमः कवचं। अरुणामहं प्रपद्ये नमः नेत्रं। सुतरसिंतनमः अस्त्रं। उद्यद्दिनकरसदृक्षप्र
भासुरांगां खखेटकचापबाणकपालमुंडसूक्क्रदधतीं त्रिनेत्रां। ध्यात्वा देवीं पीठे देवीमावाह्य पूजयेत्।
अंगैः प्रथमावरणं। प्रज्ञादिभिः पूर्वोक्तैः। अथ ऋग्वेदे सौरः। उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं।
हृद्रोगं मम सूर्य हरिमाणं च नाशय। अस्य प्रस्कण्व ऋषिरनुष्टुप् छंदः सूर्यो देवता। इष्टार्थे विनि
योगः। पूजादिकं पूर्ववत् धरणीमंत्रवत्। तेनैव यंत्रके। यो मा वा दित्यैत्यादिपंचनामवाः अभिमित्राः। अस्य
पूजादिकं पूर्ववत्। चसमस्त ऋग्वेदस्यागमोक्तो वारुणमंत्रः। युवासुवासाः सुक्षितिषु क्षिपंतो व्यसन्न
पापं वरुणो मुमोचयत्। अवो वधाता अदितेरुपस्थात् यूयं पात स्वस्तिभिः सदा नः। अस्य वारु
णपावसिष्ठ ऋषिरनुष्टुप् छंदो वरुणो देवता महैश्वर्यादिप्राप्त्यर्थे विनियोगः। युवासुवासाः सुक्षि मंत्र•
तिषु हृदयं। क्षिपंतो व्यसन् पापं शिरः। वरुणो मुमोचयत् शिखा। अवो वधाता अदितेः कवचं॥ १३६
उपस्थात् यूयं पात नेत्रं। स्वस्तिभिः अस्त्रं। अथ मातरन्यासः पादद्वयमध्यगेषु दशपायुगुह्याधार

कुक्षिपृष्ठहृत्स्तनस्तन्नयोर्द्वयं। ऐकैकं कर्णदोःसंध्यग्रेषु दश वक्त्रस्यैकं गंडघ्राणलोचनश्र
वणयुगलेषु द्वौ ऌम मध्येऽएकं मस्तके एकं सर्वांगेष्वेकमिति। ध्यानं। अंशुकाभरणमाल्यवि
लेपनाढ्यः पाशांकुशाभयवरोद्यतदोःसरोजः। स्वच्छारविंदवसतिः सुस्मितः प्रसन्नो नूयाद्विस्तृ
तिविषयेव वरुणश्चिरं वः। इति ध्यात्वा धर्मादियुक्ते पीठे वरुणमावाह्य पूजयेत्। अंगैः प्रथमावर
णं। वासुकये तक्षकाय। कर्कोटकाय। धनंजयाय। पद्माय। महापद्माय। शंखाय। कुलिकाय
नमः इति पूर्वादिपत्रेषु। इंद्रादीश्च इति संपूज्य यथाशक्ति जपित्वा विसर्जयेत्। लक्षं पुरश्चरणं पा
यसैरयुतं होमः। ऋणमुक्तो जपेन्मंत्रं प्रत्यहं साष्टकं शतं। जपेनानेन लभते महतीं श्रियमव्ययां। रसि
तैस्तु सकलैर्मंत्री जुहुयाद्घृतसंस्कृतैः। चतुर्दिनत्रो दशतं ऋणमुक्तो महाश्रियै। समिद्भिर्वैतसो
त्थाभिः क्षीराक्ताभिर्दिनत्रयं। जुहुयाद्दृष्टिसंसिध्यै मंत्रविद्विजितेंद्रियः। अनेन मनुना मंत्री स्व
र्याज्ञांते विषमांते। चतुःशतं घृतयुतं पायसं जुहुयाद्धत्री। अज्ञाननाशाय संपन्नै वशमारोग्यसिद्ध

ये।मैत्रीप्रत्यस्तु खोञ्जलात पर्यैद्धि मलैर्जलैः।इसर्वोपद्रवनाशायसमस्तासुदयायैवै।अथपंचब्र
ह्मविधानं॥ईशानःसर्वविद्यानामीश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मा शिवोमेस्तु सदाशिवों।
तत्पुरुषाय विद्महे महादेवाय धीमहि।तन्नो रुद्रः प्रचोदयात।अघोरेभ्योथ घोरेभ्यो घोरघोर
तरेभ्यःसर्वतःसर्वेभ्यो नमस्तेस्तु रुद्ररूपेभ्यः।वामदेवाय नमोज्येष्ठाय रुद्राय।कालाय।कलवि
करणाय।बलविकरणाय बलप्रमथनाय।सर्वभूतदमनाय।मनोन्मनाय।सद्योजातं प्रपद्यामि स
द्योजाताय नमः।भवे भवेनातिभवे भजस्व मां भवोद्भवाय नमः।इति पंचब्रह्ममंत्राः।ईशानमंत्रस्य
ईशानऋषिरनुष्टुप्छंदः ईशानो देवता।तत्पुरुषमंत्रस्य तत्पुरुषऋषिर्गायत्री छंदः रुद्रो देव
ता।अघोरस्याग्निऋषिरनुष्टुप्छंदः ईशानो देवता।वामदेवस्य वामदेवऋषिरनुष्टुप्छंदः सर्वेषां — मंत्र.
हृय२ हलो बीजं स्वराः शक्तयः।सकलपापपूर्वक चतुर्विधपुरुषार्थे विनियोगः।अस्माद मंत्रेण कर — १३७
शुद्धिं विधाय।ऐं श्रीं क्लीं ह्रां घां सर्वज्ञाय हृदयाय।ऐं क्लीं श्रीं ह्रीं घीं वज्रामृतयोगिनीरूपये शिरः।

ऐं क्लीं श्रीं ह्रौं घों ज्वलितशिखिशिखाय अनादिबोधाय शिखा।ऐं क्लीं श्रीं ह्रूं घों वज्रधराय वज्रिणे
कवचं।ऐं क्लीं श्रीं ह्रैं घों मौरौं क्रूं अलुप्तशक्तयेनेत्रत्रयं।ऐं क्लीं श्रीं ह्रः घों श्रीपशुं हुंफट् तत्वशक्तये अस्त्रं।
ततईशानादयो मंत्राः पंचन्यस्तव्याः।तद्यथा।ईशानमंत्रं पंचधा विभज्य कलाभिः सहस्रशक्याम्य
वारुणे उत्तरोर्ध्ववक्त्रेषु क्रमतो न्यसेत्।ईशानःसर्वभूतानां शशिन्यै नमः।ईश्वरःसर्वभूतानां अंगा
दायै नमः।ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा इष्टायै नमः।शिवो मेस्तु मरीच्यै नमः।सदाशिवों ज्वालि
न्यै नमः।इति विन्यस्य तत्पुरुषमंत्रं चतुर्धा विभज्य प्राक्दक्षिणोत्तरवक्त्रेषु क्रमेण न्यसेत्।ॐ त
त्पुरुषाय विद्महे निवृत्त्यै नमः।महादेवाय धीमहि प्रतिष्ठायै।प्रचोदयात्।शांत्यै।ततो अघोरमष्ट
धा विभज्य हृदयग्रीवांसनाभिकुक्षिपृष्ठवक्षःसु च न्यसेत्।अघोरेभ्यः तमायै नमः।अघोरेभ्यो मोहि
न्यै नमः।घोरक्षमायै।घोरतरेभ्यो मृत्युरूपिण्यै।सर्वतःसर्वमायायै।सर्वेभ्यो निद्रायै।नमस्तेअस्तु तृष्णाप्र
नायै।रुद्ररूपेभ्यो जयायै।ततो वामदेवमंत्रं त्रयोदशधा विभज्य।अथ भारबीजे कोशो रुद्रयजा

४ तन्नो रुद्रविद्यायै नमः ४

ञुद्वयजंघाद्वयस्फिकद्वयकटिपार्श्वद्वयेषुन्यसेत।वामदेवायनमःकरकलिकायैज्येष्ठायरक्षायैरु
द्राय।रत्यैकालाय।कालिन्यै।कलाकांत्यायै।विकरणायसंयमिन्यै।बलायईशानायै।बलप्रमथ
नायरात्र्यै।सर्वभूतदमनायभ्रामिण्यैनमः।मोहिन्यैउन्मनायकरायै।इतिविन्यस्यपुनःसद्योजा
तमष्टधाविन्यसेत्पादहस्ततलघ्राणमस्तकबाहुषुन्यसेत।सद्योजातंप्रपद्यामिनमःसिद्ध्यै।भ
वेभवेननमोलक्ष्म्यै।भवेनादिभवेनमोमेधायै।भजस्वमांनमःकांत्यै।भवेनमःस्वधायै।उद्भवायन
मःस्थिरायै।एवंविन्यासंकुर्वतोमहात्म्यंवैशिष्ट्यं।यथाविन्यासःप्रतिमाकृतौचनितरांसान्निध्य
कृत्स्यासयंदेहेवापिबुधैःसदानिगदितःसामान्यकारीति।अस्त्रयत्रतथ्यांबुनैवदिनशो।वि
न्यस्तदेहःपुमानत्रत्रदेशामस्तुंचयोजनमितंशैवागमज्ञाविदुः।एवंविन्यस्यशैवपीठेदेवमा मंत्र
वाह्याभ्यर्च्यपंचब्रह्ममंत्रैःक्रमेणप्राक्याम्यसौम्यपश्चिमदिक्षुईशानतत्पुरुषघोरवामदेव १३८
सद्योजातानविदिक्षुकालोश्चपूजयेत।अंगैर्द्वितीयावृत्तिः।अनंतमस्त्रादिभिस्तृतीया।उमा

द्येश्चतुर्थी।लोकपालैःपंचमीतदायुधैःषष्ठी।शेषंपूर्ववत।अथसंवादसूक्तं।संसमिद्युवसेवृष
न्नग्नेविश्वान्यर्यआ।इडस्पदेसमिध्यसेसनोवसून्याभर।संगच्छध्वंसंवोमनांसिजानतां।देवाभागंय
थापूर्वेसंजानानाउपासते।समानोमंत्रःसमितिःसमानीसमानंमनःसहचित्तमेषां।समानंमंत्र
मभिमंत्रयावःसमानेनवोहविषाजुहोमि।समानीवआकूतिःसमानाहृदयानिवः।समानमस्तु
वोमनोयथावःसुसहासति।इतिसंवादसूक्तं।अस्यसंवननऋषिरनुष्टुप्छंदःसंवाराग्निर्देव
ता।इष्टार्थेविनियोगः।ब्राह्मणहृदयं।विष्णवेशिरः।रुद्रायशिखा।ईश्वरायकवचं।सदाशिवा
यनेत्रं।सर्वात्मनेअस्त्रं।ध्यानं।धवलनलिनराजद्ब्रह्मधोनिषण्णंकरविलसितचापंसांकुशंसा
भयंचाम्भवरमभयसिंधुक्षीरगौरंत्रिनेत्रं।प्रणमतवरचक्रंमंजसंवादयंतं।१अग्निपीठेदेवमा
वाह्यपाद्यादिभिरुपचारैःपूजयेत।अंगैःप्रथमावरणं।इंद्रादिपूर्वाभिर्द्वितीयं।लोकपालैस्तृ
तीयं।एवंजपहुतजाबलाद्यीप्रतरंधनप्राप्तिर्भवति।अथपस्यसंवादमंत्रः।ॐभूर्भुवःस्वाहा।अस्यच
स्वः

गुरुषिर्गायत्री छंदः अग्निर्देवता। ॐ बीजं। स्वाहा शक्तिः। बहुतर धनप्राप्तये विनियोगः। ॐ भूः स्वाहा हृ-
हृदयं। ॐ स्वस्ति प्रणाय शिरः। उत्तिष्ठ पुरुषाय शिखा। धूमवर्णापिने कवचं। सप्तजिह्वाय नेत्रं। धनुर्ध-
नाय अस्त्रं। ॐ भूर्भुवः स्वः स्वाहा। इति मंत्रवर्णैर्वा षडंगं। नवशक्तिपर्यंतं सौरपीठं तत्र पीठे। पीतायै
श्वेतायै अरुणायै कृष्णायै धूम्रायै। तीव्रायै। स्फुलिंगिन्यै रुचिरायै ज्वालिन्यै। सर्वशक्तिकमला-
सनाय नमः। ध्यानं। शक्तिस्वस्तिकपाशांकुशावरदाभयानि दधत्रिमुखः सुकुटादिविधौ भूषो-
विद्याग्निरं पावक प्रसन्नो वहं। उपरितन दक्षिण वामकराभ्यां शक्तिस्वस्तिकौ। ततो पाशांकुशौ।
तदधो वराभये इति ध्यात्वा पूजयेत्। अंगैः प्रथमावरणं। द्वितीयं जातवेदोक्ताग्निर्लोकपालैश्च
ष्टदल संख्यं पुरश्चरणं। घृतेन पायसेन दशांशो होमः। अथापरो मंत्रः पंचविंशाक्षरः। ॐ भूर्भुवः मं॰ त्र॰
स्वरिति जातवेद इहावह सर्वकर्माणि साधय स्वाहा। ऋष्याद्यं पूर्ववत्। अथ वश्याक्ति २३९
स्वस्तिक दर्भाक्षित वस्त्र यक्ष वगभय वराद धरमिस्यक स्योवावपुस्वताकन कमालाकलि

तः दक्षिण वामकरयोर्वराभये तदुपरि स्रुक्स्रुवौ तदुपरि स्वस्तिकमालाकुलमुष्टि तदुपरि शक्तिस्व-
स्तिकौ। ॐ भूर्भुवः स्वः हृदयं। अग्निर्जातवेद शिरः। ॐ इहावह यशिखा। ॐ सर्वकर्माणि कवचं। ॐ साध-
य नेत्रं। ॐ स्वाहा अस्त्रं। अन्यत्पूर्ववत्पुरश्चरणं। अथ पुरगाग्निमंत्रः। उत्तिष्ठ पुरुष हरिपिंगल लोहिता-
क्ष देहि मे दापय स्वाहा। ऋष्यादिकं पूर्ववत्। उत्तिष्ठ पुरुष हृदयं। हरिपिंगल शिरः। लोहिताक्ष शि-
खा। देहि मे दीक कवचं। दापय नेत्रं। स्वाहा अस्त्रं। ॐ बीजं स्वाहा शक्तिः। ध्यानं। हेमाश्वकंठ सुरद्रुमो-
दर ज्वलो निर्यातमस्या कृतं वर्षतं धन धान्य रत्न निचयान् रत्नैः स्वकैः संततं। ज्वालापल्लवितस्वरो-
म विवरं नक्ता निर्मितं नेदनं। देवं धर्मसुखार्थमोक्षफलदं दिव्याकृतिं पावकं वा। अंगैर्जातवेदादिभि-
र्लोकपालैश्चावरणं। लक्षं पुरश्चरणं। सघृतेन पायसेन होमः। एतैर्धनार्थिभिर्जप्याः। अथ सो- मंत्रा
ममंत्रः। स्त्रौं सोमाय नमः। अस्य त्रिज्ञ विर्गायत्री छंदः सोमो देवता। स्त्रौं बीजं यं शक्तिः नमः इति शाल-
सी प्राप्त्यर्थे विनियोगः। स्त्रां स्त्रीं स्त्रूं स्त्रैं स्त्रौं स्त्रः इति षडंगं। ध्यानं। अमरक कमलस्य स्कंदः सुप्रसन्नाननेंदु

वैरिदकुमुदद्दस्त्रः स्तुत्रहारादिभूषः। स्फटिकरजतवर्णो वांछितप्राप्तयेवो नवतु नवहंसीष्टोद्योति
तांगः शशांकः॥२६॥ एवं ध्यात्वा हंसीदिपीठे सोमं मंडलांतर्मंत्रज्ञ पतत्र सोममावाह्य पूजयेत्। केसरस्था
न्। तारापतये। रोहिण्यै। कृत्तिकायै। रेवत्यै। रात्र्यै। आर्द्रायै। ज्येष्ठायै। कमलायै नमः इति प्रागादिदि
क्षु पूजयेत्। षट्लक्षं पुरश्चरणं। पायसेन दशांशो होमः। एवं सिद्धमनो मंत्री संपदां वमतिर्भवेत्॥
हृत्पुंडरीकमध्यस्थं तारहारविभूषितं।२९ तारापतिं जपन्मंत्री त्रिसहस्रं मतंजपेत्। राज्यैश्वर्यं दरि
द्रोपि प्राप्नुयाद्वत्सरांतरे।२ पूर्वोक्तं मेखं प्रजं जपेच्छशिनं मूर्ध्नि संस्मरेत्। रोगापमृत्युदुःखानि जित्वा
जीवेच्छतं समाः।३ पौर्णमास्यां निराहारो दद्यादर्घं विधूदये। प्राक्प्रागायतं कुर्याद्वित्तं तत्ले मंडलत्र
यं। धनिषण्णः पश्चिमे मंत्री मंडले विहिता मने। मध्यस्थे स्थापयेत्पश्चात्प्रजा द्रव्याण्यशेषतः। पत्रन्यस्मि मंत्र·
न्मंडले सोममत्वयित्वा बुजो श्चितेः। राजतं चषकं तत्र स्थापयेत्सुरतः सुधीः।४ गोदुग्धेन समापूर्य स्पृष्ट्वा तां २४०
प्रजपन्मनुं। अष्टोत्तरशतं पश्चाद्दिव्यमंत्रेण देशिकः।५ दद्यादर्घ्यं शशांकाय सर्वकामार्थसिद्धये। अने

न विधिना कुर्वन्न प्रतिमासमतंद्रितः।६ षण्मासाभ्यंतरे सिद्धिं साधकेंद्रः समश्नुते। श्रियमत्युर्जि
तां पुत्रान्सौभाग्यं पुष्कलं यशः।१९ कन्या मिष्टामवाप्नोति कन्यापि वरमाप्नुयात्। बहुनात्र किमुक्ते
न सर्वं दद्यान्निशापतिः।२० अथ विद्यामंत्रः। विद्ये विद्यामालिनि चंद्रमालिनि चंद्रमुखि स्वाहा। अस्य
मंत्रस्य सर्वं चंद्रवत्। अथ कुबेरमंत्राः। ॐ वैश्रवणाय स्वाहा।१ यक्षेशाय स्वाहा।२ पिंगलाय स्वाहा।३
विविधाय स्वाहा।४ कुबेराय स्वाहा।५ नृ स्वाहा।६ भुवः स्वाहा।७ ॐ स्वः स्वाहा।८ धनदाय स्वाहा। एव
एते दश मंत्राः धनदाः॥ हेमपीठे कनकवर्णे कनकमुकुटे करंडविलसितकरद्वयं। वृहद्वरदरत्नमंडि
तं शांरवपद्मनिधिद्योतितं कुबेरं।१ वटवृक्षाधो ध्यात्वा वैश्वदेवावसाने देवतामावाह्य तन्मुखे शाज्याक्ताः
अन्योऽसंदष्टा दशावटसमिधः दशाजिरे ते मंत्रैर्जुहुयात्। बहुतरधनलाभः स्यात्। घृताक्तपायसे
वघृताक्तबिल्वसमिधो होमेन धनलाभः स्यात्॥ अथान्नपूर्णा षोडशाक्षरी। ॐ नमो भगवति मा
हेश्वरि अन्नपूर्णे स्वाहा। शारदा तिलकेभुवनेश्वरीबीजादिरयं। तदा ससदशाक्षरः। अस्य ब्रह्मा ऋ

षिरुष्णिक्छंदः अन्नपूर्णा देवता। क्लीं बीजं। स्वाहा शक्तिः। बहुतरान्नार्थे विनियोगः। क्रां क्रीं षडंगं। ध्या
नं। रुद्रतांडवविलोकनलोलां नद्ववक्त्रनयनां नवकांतां। अन्नदाननिरतां जननीं तां चिंतयन् जयतु
चित्रदुकूलां॥१॥रक्तां विचित्रवसनां नवचंद्रचूडां अन्नप्रदाननिरतां स्तननम्रां। नृत्यंतमिंदुश
कलाभरणं विलोक्य हृष्टां भजे भगवतीं भवदुःखहंत्रीं॥२॥एवं ध्यात्वा तु वनेश्वरीपीठे देवमावाह्य पूज
येत्। अंगानि च लोकेशांश्च तदायुधानि च। प्रातरेतं जपेन्मंत्रं नित्यमष्टोत्तरं शतं। एतस्यान्नसमृद्धिःस्या
त्। श्रिया सह महीयसी॥३॥षोडशसहस्रं जपेत्। साज्येन पायसेन दशांशो होमः। अनेन मंत्रेण बह्वन्न
समृद्धिःस्यात्। अथान्नाधिपतिमंत्रः। अन्नं मह्यं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा। अस्य ब्रह्मा ऋषि
र्विकृतिश्छंदः। अन्नश्रियै देवते बह्वन्नप्राप्तये विनियोगः। अं बीजं श्री बीजं बीजं शक्तिः। अन्नं मह्यं हृदयाय। अ
न्नं मे देहि शिरः। अन्नाधिपतये शिखा। ममान्नं प्रदापय कवचं। स्वाहा अस्त्रं। ध्यानं। दुग्धाब्धिरप्राहृतकन
कमयेदीपवर्जस्तुरार्थे कल्याद् ध्यानमालेमणिमयवलिमिति वित्रयस्याप्रनामे। आसीनेन्नश्रियो वांछित

मंत्र·
१४१

वस्तुनिचयान्मंत्रिणो संसृजंतौ मंत्रीसंचिंतया नो जपतु दिनमुखे संपदेन्नस्य मंत्री॥१॥क्षीरमध्ये सुवर्णदी
पे देवगुणसंयुक्ते कल्पवृक्षवनस्याधस्तात् मणिमयचूताग्रे कुबेरस्याग्रतो भूमिं श्रियं च वांछितार्थप्रदा
यिन्यो ध्यात्वा प्रजयेत्। मद्दतीधनधान्यसमृद्धिःस्यात्। पंचविंशतिसहस्रं पुरश्चरणे ससर्पिषा पा
यसेन दशांशो होमः। अथ बृहस्पतिमंत्रोष्टाक्षरः। ब्रं बृहस्पतये नमः। अस्य ब्रह्मा ऋषिरनुष्टुप्छंदो
बृहस्पतिर्देवता। ब्रं बीजं नमः शक्तिः। हेमवस्त्रादिप्राप्तये विनियोगः। ब्रां ब्रीं इत्यादि षडंगानि। ध्यानं।
रक्तं न्नवर्णं स्रुकादीन् निजकरकमलाद् दक्षिणाद् वा किरितं। वामे पाणौ निधाय परमगुं परयुक्तं पीतवस्त्रा
दिरूपं। ध्यायन्नासीनमप्पापराणु विज्ञातमंरव्यिष्टकांचनांतैर्भीतायुष्येद्धृताके श्रिरिदिनमनुक्तनेतस्व सर्ववस्त्रा
दिसिद्ध्यै॥१॥एवं बृहस्पतिमंत्रजपे भनादिलाभो भवति। अथ शुक्रमंत्र एकादशाक्षरः। वस्त्रं मे देहि शुक्राय
स्वाहा। अस्य ब्रह्मा ऋषिर्विराट्छंदः। शुक्रो देवता। ब्रणवो बीजं। स्वाहा शक्तिः। वस्त्रादिसिद्ध्ये विनियोगः। प
दैः षडंगं। पएएवे दिकायामासीनं शुक्रं श्रुचं कुसुमानुलेपनं। वामे करेणावासो रत्नहिरण्यादीनि साधका

यथयलंते। ध्यानमुद्रांकितदक्षिणकरं शुक्लं ध्यात्वार्चयेत्। अयुतं पुरश्चरणं। सर्पिषा सहस्रं होमः।
अनेनोद्युक्तरूपं ध्यात्वा तन्मध्ये शुक्लपुष्पाणि त्रिषष्टि जुहुयात्। वाग्मी धनरत्नलाभवान् स्यात्। तदु
क्तं प्रपंचसारे। शुक्लांसे शुक्लपुष्पैर्द्युतिनु जिगणार्णाः सप्तशो ह्येकविंशद्वारं होतव्यमेषोऽप्यमितकुसु
मालेपनो वाग्मदोऽष्टः। व्याख्यानमुद्राकलितपरकरस्त्वापणाभिन्नसंस्थः। मंत्रमुक्तावल्यां त्वेवं पाठः। अन्त
रगूर्जत्स्निग्धविशोऽस्मितमधुरमुखांभोजमध्ये निषण्णः। शुक्लः संपत्तये सोऽमिततरकुसुमालेपनो सोमदोऽष्टः
अध्यादर्शसमानं। अथ वेदव्यासमंत्रः। ॐ व्यां वेदव्यासाय नमः। अस्य मंत्रस्य ब्रह्मा ऋषिरनुष्टुप् छंदः वेदव्या
सो देवता। आद्यं बीजं। अंत्यं शक्तिः। कवित्वादिसिद्धये विनियोगः। मुनिवृतायितं मुदितधियं मंनोदरुचि
रक्तं तिं व्याख्यामुद्राकलितविलसद्दक्षिणकरं परं ज्ञानोन्नत्या दृढकलितकह्लेकविवरं समासीनं व्या
सं स्मरत निरतं पुण्यनिचयं। एवं स्मरतो निरुपमकविताप्रज्ञा व्याख्या महालक्ष्मीशुद्धसरस्वतीप्राप्तिर्भव
ति। अष्टसहस्रं जपः। दशांशः पायसैराज्याक्तैर्होमः। उक्तं च प्रपंचसारे। प्रजपेति सहस्रं जपस्त दशांशास्त

तपायसाज्यद्रवनविधिः। निरूपमकविताप्रज्ञां व्याख्याश्रीसंपदावहो मंत्रः। अथ वाग्वादिनीमंत्रो वैदिकः।
याद्वाग्वदंत्यविचेतनानि राष्ट्री देवानां निषसाद मंद्रा। चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदेवैः पनसंजगाम॥
अस्य भार्गव ऋषिस्त्रिष्टुप् छंदः वाग्देवी देवता वाक्सिद्ध्यर्थे विनियोगः। ऐं बीजं। ॐ शक्तिः। त्रं कीलकं। दशभिः पं
चभिः षड्भिः पंचभिर्दशभिः षडंगं। अस्य जपेन सारस्वतसिद्धिः। अथ गौरीमंत्रः षोडशाक्षरः। ॐ श्री गौरि रुद्रप्रिये यो
गेश्वरि हुं फट् स्वाहा। अस्य अज ऋषिः बृहती छंदः गौरी देवता। वशादिसिद्धये विनियोगः। ध्यानं। अरुणकलशशशि
राजन्मौलिशाला बद्धपाशां कुशाढ्या रुचिरकरा बंधुजीवारुणांगी। अमरनिकरवंद्या त्रीक्षणा शोणलेपांशुक
श्रयुगयुता स्यात्पार्वती संपदे वः। एवं ध्यात्वा शक्तिपीठे देवीमावाह्य पूजयेत्। मातृकाभिरेकं लोकपालैर्द्विती
यं। लक्षं पुरश्चरणं। पायसेन दशांशो होमः। सौभाग्यादिसिद्धये स्त्री जपेत्। वश्यार्थं पुरुषोऽपि चेत्पुरुषोऽस्य
वेतसा वश्यानत्यागच्छति। अथ गांधारीमंत्रः एकोनविंशाक्षरः। कांचितस्त्री वशंकरि स्व स्व हृदय वा वास्त्री
स्वाहा। अस्य सर्वं पूर्ववत्। वेदत्यक्षरा उपरि वा त्र्यक्षरादर्वाक् स्त्रियो वा पुरुषस्य वा नाम संयोज्य जपेत्।

शीघ्रं वशीकरोति॥ अथापरो गौरीमंत्रः एकषष्टिवर्णात्मकः॥ ॐ ह्रीं नमः ब्रह्मन् श्रीराजिते राजपूजिते जय
विजये गौरि गांधारि त्रिभुवनवशंकरि सर्वस्त्रीपुरुषवशंकरि सुसु दुदु घेघे वावा ह्रीं स्वाहा॥ अस्यादिकं
गौरीवत्॥ चतुर्दशभिर्दशभिस्तथाष्टभिस्ततो दशभिः एकादशभिर्मंत्रार्णैः षडंगविधिः स्मृता॥ अर्कैः पयसेंद
रंशोद्वोः वा शशाष्टादवांकसाध्यनाम योजयित्वा मंत्रं जपेत्॥ अशेषं वशीकरोति॥ अन्यत्पूर्ववत्॥ अथ राजमु
खीमंत्रः॥ ससत्रिंशदक्षरात्मकः॥ ॐ राजमुखि राजाधिमुखि वश्यमुखि श्रीं ह्रीं क्लीं देवि देवि महादेवि
देवाधिदेवि सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा॥ अस्याजऋषिस्त्रिवृतछंदः त्रिभुवनमोहिनी गौरी दे
वता क्लीं बीजं स्वाहा शक्तिः वश्यादिसिद्ध्यर्थे विनियोगः॥ ॐ राजमुखि राजाधिमुखि हृदयं वश्यमुखि श्रीं ह्रीं
क्लीं शिरः देवि देवि शिखा॥ महादेवि कवचं॥ देवाधिदेवि नेत्रं॥ सर्वजनस्य मम वशं कुरु कुरु स्वाहा॥ अस्त्रं॥ मंत्र· २४३
अन्यत्सर्वं गांधारीमंत्रवत्॥ अमकलेत्यादि ध्यानं॥ सर्वजनस्य स्थाने साध्यनाम प्रक्षिपेत्॥ सहस्रादौ जपेत्॥ राजान
मन्यं वा वशीकरोति॥ अथ पन्नरिजयमंत्रः॥ षड्विंशत्यक्षरः॥ नगे नगे ह्रीं नमये छेदये क्लेदये क्लिन्न साशरीरे ॐ

फट् स्वाहा॥ एष मंत्रवरः श्रीमान् त्रिषु लोकेषु विश्रुतः॥ नाम्ना पन्नरिजय इति स्वयं देवेन भाषितः॥ १ दुर्गाणां
च कोपानां निर्दग्धाणां वरानने॥ बुद्धितेजोविहीनानां विद्यागुणविवर्जितां॥ २ एतज्जपेन तत्सर्वं समाप्नोति
च मानवः॥ यस्य छिद्रे हीनो जपति तत्तन्नस्यापि नश्यत्संशयं॥ ३ अथ रत्नधारामंत्रः॥ रत्न रत्नमहारत्नधाराय स्वाहा॥
४ची प्रजापतिऋषिर्गायत्री छंदो रत्नधारा देवता॥ रत्नधारादिलाभे विनियोगः॥ मंत्रविभागैरंगं॥ साधकाय र
त्नवरां वर्षतं हस्तात्यादारघुकुटादिभूषणभूषितं॥ ध्यायन् जपेत्॥ महतीं धनसमृद्धिः स्यात्॥ अथ शास्त्रमं
त्रोनुष्टुप्॥ ॐ शास्त्रारं मृगयाश्रांतिगं अश्वारूढं गणावृतं॥ पानीयार्थं वनादेस्यः शास्त्रे तेरे वते नमः॥ अस्य रेव
तऋषिः प्रकृति छंदो महाशास्ता देवता॥ वश्यार्थे विनियोगः॥ मंत्रपदैः षडंगं॥ पाशबद्धं साध्यं साधकपादयोः
पादयंतं दंड भारं ध्यायन् जपेत्॥ तत्फलं प्रजायथा॥ गोप्त्रे पिंगलाक्षाय वीरसेनाय श्रीशिवाय त्रिनेत्राय शि
शूलिने दक्षायनीमरूपाय नमः इति प्रजयेत्॥ एवं ध्यात्वा मध्याह्ने अस्मै अंजलिना जलं दद्यात्॥ तत्फलं स्य
॥ विश्रांताय नमः॥ तस्मिंस्तु कार्याणि निवेदयेत्॥ प्रीतचेतास्तथेत्युक्का सत्वयात् इति स्मरेत्॥ मंत्रस्तु रवो हंता

यशास्त्रेप्रशास्त्रेगायत्री।वृताधिपायविद्महेमहादेवायधीमहि।तन्नःशास्त्रंप्रचोदयात्॥अथकाममंत्राः॥तंत्रे
काक्षरः॥क्लीं॥अस्यसंमोहनऋषिर्गायत्रीछंदःकामोदेवता।सकलपुरुषवशार्थेविनियोगः॥क्लांक्लीमिति
षडंगं।नेत्रद्वयंस्तु।ध्यानं।अरुणकिरणवासोमाल्यदामांगरागंकरललितसुपाशांसांकुशास्त्रेक्षुचापं।
मणिमयमुकुटाद्यैर्दीप्तकल्पांशुजालैररुणनलिनसंस्थंचिंतयेदात्मयोनिं॥श्वामोर्द्धकराभ्यांअंकुशपाशौ
तदधस्तनाभ्यांबाणधनुषी।एवंध्यात्वावसुदलकमलकर्णिकायांदेवमावाह्यपूजयेत्।नवशक्तिर्यथा।
मोहिन्यै।क्षोभिण्यै।द्राविण्यै।स्तंभिन्यै।आकर्षिण्यै।विद्राविण्यै।आल्हादिन्यै।क्लिन्नायै।ततोंगावरणं।द्रांशोषणबा
णायनमः।द्रींमोहनबाणायनमः।क्लींदीपनबाणायनमः।ब्लूंसंतापनबाणायनमः।संउन्मादनबाणायनमः
इतिप्रादक्षिण्येनबाणान्पूजयेत्।अनंगरूपायै।अनंगमदनायै।अनंगमन्मथायै।अनंगकुसुमायै।अ मंत्र॰
नंगशिशिरायै।अनंगमेखलायै।अनंगदीपिकायैनमइतिदिक्षुप्रपूजयेत्॥अथापरःकामराजमंत्रः॥स १४५
प्तदशाक्षरः।क्लींश्रींकामदेवायसर्वजनमोहनायस्वाहा।षड्दीर्घभाजास्वबीजेषडंगानि।ध्यानंचकामराजो

क्लींवर्णलिप्तंपुरस्चरणंतद्दशांशोनहवनादीनि॥अथगायत्री।कामदेवायविद्महेपुष्पबाणायधीमहि।
तन्नोऽनंगःप्रचोदयात्॥अथापरोनंगमंत्रः।एकोनपंचाशदक्षरः।ॐक्लींनमःकामदेवायसर्वजनप्रियायस
र्वजनमोहनायज्वलज्वलप्रज्वलप्रज्वलसर्वजनंममवशंकुरुस्वाहा॥क्लींॐ।अस्यऋष्यादिकंपूर्ववत्॥अ
थप्रकारांतरं।अमृतोद्भवायमकरकेतनायसंकल्पजायअक्षररूपायधनुर्धरायपुष्पशराय।
नमइतिपदैःस्वाहांतैःषडंगंविधायध्यायेत्।क्लांक्लींचइत्यादिबीजानि।ललाटमुखकंठहृदयगुह्येष्वन्य
सेत्।अरुणवसनमाल्याभरणमिक्षुचापपुष्पबाणधरंध्यात्वाआवाह्यपूजांकुर्यात्।पंचोपचारैः।अंगैःप्रथ
मावरणं।ततोबाणैः।क्लींयुवत्यै।क्लींविप्रलंभायै।क्लींज्योत्स्नायै।क्लींसुचुंवे।क्लींमदद्रवायै।क्लींस्तन्यै।क्लींवारु
ण्यै।क्लींलालस्यै।क्लींकांत्यै।क्लींसौदामिन्यै।क्लींकामच्छिन्नायै।क्लींचंद्ररेखायै।क्लींशुकै।क्लींमदनायै।क्लींमायावत्यैन
मइतिप्रादक्षिण्येनप्रपूजयेत्।क्लींशोकाय।क्लींमोहाय।क्लींविलासाय।क्लींमदनातुराय।क्लींअपत्रपाय।क्लीं
यूने।क्लींकामिने।क्लींघनपुष्पाय।क्लींरतिप्रियाय।क्लींग्रीष्माय।क्लींतपांताय।क्लींनूर्जाय।क्लींहेमंताय।क्लींवा

शिराय।क्लीमदनायनमइतिकामादिपत्रिकाराग्न्यादिषुपूजयेत।लक्षंपुरश्चरणं।अरुणपुष्पैर्दशांशोहो
मः।सकलवशार्थंजपपूजा च।।अथ ज्येष्टामंत्रः।सप्तदशाक्षरः।ॐक्लीश्रींआदिलक्ष्मिस्वयंभुवे
ज्येष्ठायैनमः।अस्यब्रह्माऋषिःपंक्तिश्छंदोज्येष्ठाबीजं।क्लींशक्तिरिष्टार्थेविनियोगः।ऐंक्लींश्रींहृदयाय
नमः।आद्यलक्ष्मिशिरसि स्वाहा।स्वायंभुवेशिखायैवषट्।क्लींकवचायहुं।ज्येष्ठायैनेत्रत्रयायवौषट्।।
नमःअस्त्रायफट्।।ध्यानं।पद्मासनस्थामरुणामरुणांबरधारिणीं।कुंकुमक्षोदलिप्तांगींप्रोत्फुल्लकमले
क्षणां।स्मेरस्मितमुखींज्येष्ठांकलशंवसुपात्रकं।दधानामूर्ध्वबाहुभ्यांपाशमंकुशकंतथा।चिंतयेत्परया
भक्त्यादेवीमिष्टसमाहितः।धर्मादिसहितेपीठेदेवीमावाह्यपूजयेत।लोहिताख्यायै।विश्वरूपाख्यायै।क
राल्यै।नीललोहितायै।समदायै।वारुण्यै।पुष्ट्यै।अमोघायै।विश्वरूपिण्यैनमइतिपूर्वादिदलेषुपूजयेत।अंगैः मंत्र·
प्रथमावरणं।लोकपालादयःपूज्याः।लक्षंपुरश्चरणं।पायसेनदशांशोहोमः।अथषोडशाक्षरःशत्रुनिग्रहः। १४५
ॐब्रंकंवंहंउंपंहलोंक्लींदुःसहफट्स्वाहा।अस्यब्रह्माऋषिःपंक्तिश्छंदः।महापार्वतमपुत्रमहावह्निमह

पवनपृथिवीगगनादिदेवताः।ॐबीजं।क्लींशक्तिः।शत्रुनिग्रहार्थेविनियोगः।हृल्लेखाद्यैःषडंगानि।ध्यानंनास्य
पश्चात्पूजादिकंमूलमंत्रेणकुर्यात्।षट्सहस्राधिकमयुतंपुरश्चरणं।तिलसर्षपतंदुलव्रीहिविषाद्यै
र्यथाविभागंजुहुयात।शत्रुनिग्रहार्थमुपयुक्तः।प्रथममंत्राक्षरंपर्वतरूपंशत्रुग्रहस्यमानंविचिंतयेत।द्वि
तीयंसमुद्ररूपं।तत्रनिमग्नं।तृतीयमग्निरूपंतेनदह्यमानं।चतुर्थंपवनरूपंतेनसंशोष्यमाणं।हलोमिति
वर्णद्वयेनशत्रुंविश्वासंरुद्धंतंचिंतयेत।क्लींदुःसहइत्यक्षरत्रयेणशत्रोर्नेत्रकर्षणंमुखरुद्धंध्यानंचिंतयेत।फट्
कारेणशत्रोःशरधारादुष्टिताग्निनादह्यमानंविचिंतयेत्।एवंध्यायन्मंत्रंजपन्मंडलादर्वाक्शत्रुंमारयति।अ
यस्मैकंचान्यकोलवणमंत्रः।लवणंनसिसुतीक्ष्णोस्युग्रोसिहृदयंतव।लवणस्यपृथिवीमातालवणस्यवरु
ति णःपिता।लवणंपर्वंपाचयतिनिर्लेश्छिदतिलवणेनप्रमाणेनकृतोनिद्राकृतोरतिः।अमुष्यदह्यगात्राणिदह
त्रिंगोदहलुंचंदहत्वग्मांसिलोमानित्वच्छिरोमज्जिकंदह।यारात्रिःशल्यविद्धस्यशूलाग्रारोपितस्यच।यतेरा
त्रिर्महाराविसारेराचमदानित्रिधा।ॐश्रांक्रींक्रोंविडिविडिचांडालिमहाचांडालिअमुकंवशमानयस्वाहा।।

विडिमंत्रस्यस्वधांतेत्रमुंपठति।लोकप्रकारनगरेरुद्रसपर्वहितागलि।चंडिस्वाहानयनेत्रीघंमग्नेर्लवणांते
नमः।अस्यागिराऋषिरनुष्टुप्छंदः।अग्निदुर्गान्नद्रकालोदेवता।हंबीजं।संज्ञाशक्तिः।वज्रपादिसिद्ध्येविनियो
गः।ऋरूपंचनिःक्रमेणपंचांगं।ॐविडि२हृदयं।वांडालिशिरः।महाचांडालिशिखा।अनुकंमेककवचं।व
शमानयनेत्रं।स्वाहाअस्त्रायफट्।ध्यानं।अरुणोरुणपंकजस्थंनिहितःस्रुचश्चक्रिवरान्नययुक्तकरः।
अमितार्चिरिजातगम्भइतिविलसन्नयनत्रितयोःवडवोदहन्।१ऊर्ध्वदक्षिणवामकराभ्यांस्रुचशक्तीतदधस्त
नाभ्यांवराभये।नीलतरोत्तुंगकलशंदलापाणीप्रतनुर्निरिजस्तुतहाराः।मांकुशपाशाभ्यूलकपालजायामवतीन्न
वतोवडनित्यं।२दक्षिणोर्ध्वकरेत्र्यंकुशःतदधःशूलं।वामेपाशं।तदधःकरकपालं।करकमलविराजत्कंकणं
खासिशूलापरिलसितकिरीटायातितानेकदैत्या।त्रिनयनललितांगीतिग्मरश्मिप्रकाशापवनसखनितां मंत्र
गीपातुकात्यायनीवः।श्यामाधनघतनिनारुणरुधिरकिंकिणी।मालिकाश्रिये।तवनवडसिद्धयेनद्रका २४६
लीचिरं।२दक्षिणाधःकरमारस्यपशुरशूले।वामाधःकरमारस्यकपालडमरुके।एवंध्यात्वापंचोपचारैः

पूजयेत्।अयुतंत्रिसहस्रंवापुरश्चरणं।घृतयुक्तेनहविषादशांशोहोमः।एवंकृतपुरश्चर्यःप्रयोगेकुर्या
लोनवेत।अग्निंयामवतीध्यायेद्वशाकर्षणकर्मणि।२स्मरेत्दुर्गान्नद्रकालीमंत्रमारणकर्मणि।जानुप्रया
णमलिलेस्थित्वानिशिजपेन्मनुं।२अनेनवांछितस्माध्यःकिंकरोजायतेक्षणात्।नाभिमात्रोदकेस्थित्वाजपेन्मं
त्रममुंसुधीः।३अष्टोत्तरसहस्रंयस्तस्यसाध्योनवेदृशः।ऊककपंचमंजपेन्मंत्रीकंठमात्रांलसिस्थितः।धसप्तनि
दिवसैर्नृयोवशायेदिधिनामुना।विलिख्यतालपत्रेत्रंसाध्यनामविदर्भितं।पनिक्षिप्यक्षीरसंमिश्रैर्जलैस्तत
क्राथयत्रिशि।वश्योभवतिसाध्योस्यनात्रकार्याविचारणा।हतापयेत्खादिरेवह्नौमासंवश्योभवेन्त्रिशि।दात्र
यपुत्रप्रदमंत्रः।ॐनमोभगवतेब्रह्मणेवेधसेअष्टोमेपुत्राजायंतांअक्षीणेरेतसेस्वाहा।अस्यब्रह्ममंत्रस्यसोभरि
ऋषिरनुष्टुप्छंदः।ब्रह्मादेवता।ॐबीजं।स्वाहाशक्तिः।अष्टपुत्रबहुतरधनधान्यादिप्राप्तयेविनियोगः।ॐनमो
भगवतेहृदयं।ब्रह्मणेशिरः।वेधसेशिखा।अष्टोमेपुत्राजायंतांकवचं।अक्षीणरेतसेनेत्रं।स्वाहाअस्त्रं।ध्यानं।
अरुणकमलसंस्थोरक्तवर्णोविरंचिर्विविधरुचिरभूषालंकृतो।विश्वयोनि।अनयवरकमंडलुस्रुक्स्रुवैःसबाहु

वितरतु विविधार्थान्विश्वभोगानसुपत्नान्॥१॥ एवंध्यात्वा मानसैरुपचारैरभ्यर्च्य विधिवदर्घ्यं संस्थाप्य तत्राधारादि
युक्तं पीठं परिकल्प्य तदुपरि अष्टदलं कमलं कृत्वा पूजादिक्रमेण। अणिमायै। महिमायै। लघिमायै। गरिमायै।
प्राप्त्यै। प्राकाम्यै। वशितायै। कामवशितायै नमः इति मध्ये। ॐ नमो भगवते कमलसंस्थाय नमः इति पीठे पूजयित्वा
तत्कर्णिकायां देवमावाह्य पाद्यादिभिरुपचारैरभ्यर्चयेत्। अंगैः प्रथमावरणं। ऊर्ध्वप्रलंबाय। ऊर्ध्वकेशाय। विमो
हनाय। गंधपतये। कलिंगाय। कपये नमः इति पूर्वदलमारभ्य पूजयेत्। लोकपालांश्च स्वदिक्षु। ततो यथाशक्ति
पूजयित्वा स्वहृदि देवं विसर्जयेत्। लक्षं पुरश्चरणं। पायसेन दशांशो होमः। प्रातः स्नात्वा विमलकरणः शुद्धवस्त्रा
नुयोगी गांगावासः इति यदि वान्यत्र तीर्थे सुपुण्ये शैलाग्रे वा महति मधुराहारपूतः पवित्राचारैः पुण्यैरनुदिनमवाप्य
खिलार्थे मनस्वी॥१॥ अनुदिनमिति मंत्रं संजपेत्। यो मंत्रमेनं सततं धनार्थी विद्याकामी बहुपुत्रकामी। किंचान्यका मंत्र·
मीप्सनं लभेत तत्र श्रेष्ठो द्विजान्तु संक्रमयेच्च तस्य॥२॥ अनुदिनमुदये त्रिसंध्यं शतमथवार्धशतं जपेच्च नित्यं। सलिलम २४७
त्॥ मादिषैः पंचगव्यैस्तं बिडालेतत्र निक्षिपेत्॥२८ जपपूजादिकं सर्वं यथा पूर्वं समाचरेत्॥ कारस्करनवे वन्हौ स्त्रयास्त्रे
णाभमन्विते॥२९ अयुतं ब्रणतैलेन हुत्वा न्पेन घट पुनः॥ ग्रामस्थकं समुद्धृत्य जपेन्मंत्रमनन्यधीः॥३० जुहुयाद्दक्षि
णाते न त्रिदिनान्म्रियते रिपुः॥ बिडालोमान् रिः॥ ब्रणतैलं निरखाताकतेर्ध्वा संदरं महिषीवसः एकरात्रमुपोषितः॥३१
पाययेन्महिषीसर्पिः प्रत्यक्षमंत्रेणमंत्रवित्॥ क्रूरो राबहुसर्वांगं स्थापयेत्प्राणमंजसा॥३२ कारस्करेधितेवन्हौ ब्रणतैले

नमंत्रवित्॥ होमंत्रस्तावुतंवक्ष्यंजुहुयात्यतमानसः॥३३॥ एकेनदिवसेनारिर्गच्छेद्यमपुरंसुधीः॥ त्रिकोणकुंडनिर्दिष्टे
वर्णमंत्रेणदीपिते॥३४॥ अर्चितेगंधपुष्पाद्यैरयुतंजुहुयात्क्रमात्॥ राजीनस्नातकतिलतिलैःसप्तदिनंततः॥३५॥ अस्मृ
तिसमयेप्राप्तेमद्विषीस्यात्॥ पितांबुरः॥ जितांगंधपुष्पाद्यैःस्प्रशनूकुर्वन्नजांजपेत्॥३६॥ मस्तकाद्योनिपर्यंतंविधायव
ह्मनुस्मरेत्॥ ध्यात्वाध्यद्दस्तपतितंजुहुयादेष्टितेनले॥३७॥ एवंकृतेसमुत्पन्नाकृत्यादीप्ताद्भुताननात्॥ नश्येदरि
ऋत्तुमीश्वरेणापिरक्षितं॥३८॥ पुनरग्नौविशत्येषाकांत्ताररिमपिकोपितः॥ एवंविधानिकर्माणियःकुर्यान्मंत्रवित्तमः॥३९॥
सजपेदात्मरक्षार्थंमंत्रंमृत्युंजयादिकं॥४०॥ इतिश्रीमदाशादित्यत्रिपाठीविरचितेमंत्रकोशेकृत्याभिकथनंनामाष्ट
दशःपरिच्छेदः॥ ॥ अथयंत्रेवक्ष्यमाणेपूर्वंहोमीयद्रव्यपरिमाणंलिख्यते॥ अथहोमद्रव्याणांप्रमाणंलिख्यते॥ कर्षमात्रंघृ
तंहोमेशुक्तिमात्रंपयःस्मृतं॥ उक्तानिपंचगव्यानितत्समानिमनीषिभिः॥१॥ तत्समंमधुदुग्धान्नंमुक्तमात्रमुदाहृतं॥ दधि मंत्र॰
प्रसृतिमात्रंस्याद्धाजाःस्युर्मुष्टिसंमताः॥२॥ पृथुकास्तत्प्रमाणाःस्युःसक्तवस्तथोदिताः॥ गुडंपलार्धमात्रंस्यात्शर्करापि २६९
तथास्मृता॥३॥ ग्रासार्धंचरुमानंस्यादिक्षुपर्वविधिःस्मृताः॥ एकैकंपत्रपुष्पाणितथाश्मोदकाः॥४॥ कदलीफलनारि

गफलान्येकैकशोविदुः॥ मातुलिंगंचतुःखंडंपनसंसप्तधास्मृतं॥५॥ अष्टधानालिकेराणिखंडितानिविदुर्बुधाः॥ द्विधास्
तंफलंबिल्वंकपित्थंखंडितंत्रिधा॥६॥ उर्वारुकफलंहोमेखंडितंनोदितंत्रिधा॥ फलान्यन्यान्यखंडानिसमिधःस्युर्द्व्या
गुलाः॥७॥ वर्त्रियंसमुद्दिष्टंगुरुचीचतुरंगुला॥ व्रीहयोमुष्टिमात्राःस्युःसर्षपास्तत्प्रमाणतः॥८॥ जवानांशतंमात्रंतिला
नांचतथैवच॥ शुक्तिप्रमाणंलवणंमारीचान्यपिविंशतिः॥९॥ पुरंबदरमानंस्यात्रामठंतशमंस्मृतं॥ चंदनागरुकर्पूरक
स्तूरीकुंकुमानिच॥१०॥ चिंचिणीबीजमानानिसमुद्दिष्टानिदेशिकैः॥ एकात्रस्यतुपानानिश्रेन्यशास्त्रस्मृतानि॥११॥ इति
होमद्रव्याणि॥ अथाग्निविशेषाः॥ विश्वानरंस्थितंध्यायेत्सर्वहोमेषुसर्वदा॥ शायानमाज्यहोमेषुनिषण्णंशेषवस्तुषु॥१॥
स्यांतर्जुहुयादग्नेर्विपश्चित्सर्वकर्मसु॥ कसद्विमेनवेद्याधिनेत्रेंधत्तमुदीरितं॥२॥ नासिकायांपुनःपीडामस्तकेधनस
क्षयः॥ स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसंनिभः॥३॥ सुवर्णरेतसोवह्निःशोभनःपरिकीर्तितः॥ भेरीवारिदहस्तीद्रध्वनिर्व
ह्नेःशुभावहः॥ धनागचंपकपुन्नागपाटलायूथिकानिभः॥४॥ पद्मेंदीवरकह्लारसर्पिर्गुग्गुलसंनिभः॥५॥ वाय्यकस्यशुभोगंधो
ऽस्तुकुंभसवेदिनिः॥ दक्षिणास्यक्रकंपाःस्वच्छानाःशिखिनःशिखाः॥६॥ राजपमानस्यराज्यस्यापिविशेषतः॥ कुं

हेंडुधवजो धूमो वक्रेः शोकः शुनाव हः।७ अश्वः स्खलगतेवश्मोय जमानं विनाशयेत्। खेलो राज्यं निरहं स्याशुवा स्य सखर
सं निशः।८ खरस्वन समो वक्रे ध्वनिः सर्वविनाशकृत्।९ तगंधो ऽतनुजो हो इर्दुःखप्रदो भवेत्।१० छिन्नाग्रचाशिखाऽ
र्यान्मृत्युं धनपरिक्षयं। शुकपक्षस्वनो धूमः पुरापतसमप्रभः।११ हानिं तुरगजातीनां गवां च कुरुते चिरात्।। एवं विधेषु
बे४ दोषेषु प्रायश्चित्ताय देशिकः।१२ मूलेनाज्येन ॐ यात्प्रायश्चित्ताय देशिकः। देशाभ्रिविशेषो होमेऽज्ञाल बः।। अथ यंत्राणि त
त्रमातृकायंत्रं।। तत्रीयोहृल्लकर्णिकं स्वरयुगे राविर्न वल्केसरं वर्गाष्टं। मिवसुदलं वसुमतिगेहेन संवेष्टितं। ताराथ
बरवारिवर्ण विलसद्दिक्कोणसंशोभितं यंत्रं वर्णतनोरिदं निगदितं सर्वामयघ्नं परं।१ तारात्रीयं बालत्रिपुरामंत्रस्तृतीयं
सौं इति बीजं। अन्यसुगमं। ताराथ्रीश्वरश्चंद्रः तद्बीजं। इति दिक्षु। वारिबीजं वं इति कोणे। इत्तो हीनामुद्रायथा।। सोमस
र्याग्निरूर्वाः स्मृवर्णलोहत्रयं तथा। रौप्यमिंदुः सूर्य ताहेमस्य र्यस्ताम्रं कृताशनः।१ लोहनागाः समुद्दिष्टाः स्वराद्यक्षरसं मंत्र·
रव्यया। लिखेर्लोहेः कारयेन्मुद्रामसंकल्पितसंगतां।२ साग्रं सहस्रं संजप्य स्पृष्ट्वा तां जुहुयात्ततः। तस्यां पोमे दयेन्मंत्री १७०
सर्पिषा पूर्वसंख्यया।३ निक्षिप्य कुंभे तां मुद्रां त्रिशिष्ये कृतवर्त्मना। आवाह्य पूजयेद्देवीमुपचारैः समाहितः।।अथ त्र

निषिच्य विनीतायदद्यात्तां मुद्रिकां गुरुः।। व्यालचौरमृगादिभ्यो रक्षां कुर्याद्विशेषतः।५ पुत्रदेविजयमारोग्यंतिधारयेद्धि
मनुजेश्वरः। स्वराद्यक्षरसंख्ये तिथि षोडशा पंचविंशति दशा संख्ये येस्यर्थः। सोमात्मके रूप्यनागे षोडशार्णं सूर्यात्मके
सुवर्णं पंचविंशति नागं अग्न्यात्मकं ता। एवं धारितमुद्रा उक्तफलदा भवति। इति मातृकायंत्रं।। अथ महालक्ष्मीयंत्रं।।
वेदादिक्किनमः ध्यनामयुगशः श्रीशक्तिमारावृत्तं किंजल्केषु दिनेशपत्रविलसन्मंत्राक्षरं तद्बहिः। पद्मं व्यंजककेसरं स
रस्वतपत्राद्युग्मे धराबिंबाभ्यां वषडंतयोतं रितयायंत्रं लिखेद्वेष्टितं।१ वसुरुद्रयकोणेषु हल्लोर्जेरव्यो। पुनः पुनः
महालक्ष्मीयंत्रमिदं सर्वैश्वर्यफलप्रदं।२ सर्वदुःखप्रशमनं सर्वापद्विनिवारणं। बहुनात्र किमुक्तेन परमस्मात्र विद्य
ते।३ अस्यार्थः। द्वादशपत्रं पद्मं। तत्र नवकर्णिकायां ॐ मिति विलिख्य तन्मध्ये मायानामश्रीबीजं। ह्रीं बीजं। क्लीं बीजं
इति बीजत्रयसहितं विलिखेत्। किंजल्केषु बीजत्रयं युगशो लिखेत्। द्वादशपत्रेषु मंत्राक्षरद्वादशांतद्बहिः षोडशपत्रे क
मलं तत्केसरेषु युगशो व्यंजनानि पत्रेषु षोडशस्वराः इति तद्बहिश्च [illegible] बिंबद्वयं लिखेत्। वषडंतेन तत्रितांत्रे एवेष्ट
येत् तत्कोणेषु हल्लेखा विनिलिखेत्। इत्युक्तं फलं भवति। इति महालक्ष्मीयंत्रं।। अथ भुवनेश्वर्या त्रिगुणितं यंत्रं।। शाक्तं

तस्थितसाध्यकमुखेवनेवक्रेर्व्रतंशक्तिनिबद्धिकोणगतेयुतंहरिहरैर्बलैंकपोलापितैस्तस्मात्सेभुवनेरीयुतेलिपिभि
रष्पावीतमिष्टार्थदंयंत्रंन्रूहरमध्यगंत्रिगुणितंसौनाग्यसंपत्करं॥अस्यार्थः॥त्रिकोणंविलिख्यतन्मध्येक्रींबीजंतन्म
ध्येसाध्यनामसहितंकर्म॥कथंदेवदत्तेरत्तरहइत्यादिकोणत्रयेईलिखेत॥तद्बहिःक्रीं॥अन्योन्यंबध्नीयात्कथंएषां
बीजानांएकहराकराभ्यांप्रदक्षिणीकृत्यरेफदकाराभ्यांबध्नीयात॥ततःकोणकपोलयोःहरिहरइतिलिखेत॥अथ
अथवाहरिशब्देनहकाररेफईकाराःस्यंते॥हरशब्देनहकाररेफाविति॥क्रींक्रींक्रंइतित्रयंपक्षस्सांप्रदायिकं॥ततो
हरिःईईइतिलिखेत॥अथवाइंक्रूंईइतिलिखेत॥तद्बहिःपंचाशदक्षरैर्वावेष्टयेत॥भुवनेश्वरीहेणवेष्टयेत॥एतत्रिगुणितंयं
त्रंउक्तफलप्रदंनवेततथा॥अथषड्गुणितंयंत्रं॥बीजांतस्थितसाध्यनामसहारणेमायारसामस्थैवीतंवह्निपुरद्वयेर
म्पुटेर्व्याख्या॥बीजत्रयं॥सात्मानामेकमार्गषंहरिहरैराबद्धगंडंबहिःषड्बीजैरनुबद्धसंधिलिपिभिर्वीतयहान्तानुवं मंत्र १११
॥चिंतामणिवत्सिंहासनालस्यकोणमिदंलिखेत॥यंत्रषड्गुणितंदिव्यंवहतांसर्वसिद्धिदं॥अस्यार्थः॥षट्कोणेक्रींससाध्यं
लिखेत॥कथंबीजस्परेफेनागेसाध्यनाम॥ईकारस्तागेसाधकनाम॥उभयोर्मध्येकर्मीरणेवारपंचकंमध्येक्रींबीजेनश्रींबी
बीजं १

जंक्रींबीजेनवेष्टयेत॥तद्बहिःषट्कोणेषुमात्मकानिमानुस्वराणिलिखेत॥दक्षिणकोणत्रयेतान्येवनिरात्मकानित्रुतु
स्वाररहितानिइशिरःषट्कोणमध्येसानुस्वारइकारंगंडयोहरिहरइति॥षट्कोणद्वयेनइवीदिषुबीजानिसंबंधानिलि
पिभिर्वेष्टयेत॥नृकोणद्वयेपूर्वादिश्चनृसिंहबीजंकोणेषुचिंतामणिः॥इतिषड्गुणितंयंत्रं॥बीजंव्याहृतिभिर्वृतंग्रहयुग
द्वंद्वेवसोःकोणगंदौर्गंबीजमनंतरंलिपियुगेराबद्धगंडं॥लिखेत॥गायत्र्याविशक्तिबद्धविवरंत्रिष्टुप्वृतंतद्वतोवी
तंमातृकयाधरायुरयुगंसन्सिंहचिंतामणिः॥यंत्रंदिनेशगुणितंप्रोक्तंरक्षाप्रसिद्धिदं॥सर्वसौभाग्यजनकंसर्व
शत्रुनिवारकं॥अस्यायमर्थः॥पूर्वोक्तषट्कोणद्वयंयथावत्संपुटितंस्थवातन्मध्येशक्तिबीजंलिखित्वातत्कमम
पिपूर्ववल्लिखेत॥माध्यसाधकादितद्वीजंव्याहृतिनिर्वेष्टयेत॥विलोमव्याहृतिनिरपिवेष्टयेत॥इतिसंत्रांतरे॥व
सोरष्टकोणगदो॥क्रूंबीजद्वादशकोणाभ्यंतरेडमिति॥दुर्गाबीजंलिखेदित्यर्थः॥लिपियुगेराबद्धगंडंगायत्र्याइति
संबंधः॥प्रतिलोमगायत्र्येतितंत्रांतरेरविशक्तिविवरंद्वादशकोणाग्रगतान्योन्याबद्धंबीजंवामित्यर्थः॥त्रिष्टुप्व्रतं
जातवेदसमंत्रेवृत्तप्रतिलोमेनापीनितत्रांतवीतंमातृकयातद्बहिःपंचाशदक्षरैर्वेष्टयेत॥प्रतिलोमैरितितत्रांतरे

तद्बहिर्द्विपरद्वयेनावेष्टयेत्॥ दिक्कोणेषुनृसिंहबीजानि विदिक्षु चिंतामणिबीजानि॥ लिखेत्सरोजं रसपत्रयु
क्तं मध्ये दले षट्सु निलिख्य मायां। स्वरामिदं यंत्रमिदं च धूर्तानां घुत्रमदे त्रमिगृढां तरस्थं। २ षट्कोणमध्ये प्रविलिख्य मा
यां कोणेषु तामेव विलिख्य तद्यत्। समाध्यगर्भं वसुधापुरस्थं यंत्रं नवेद्वश्यकरं हि नृणां। ३ त्र्याविलिंग्य पद्दिगंगनान्युद
रंगपाशा। दिक्कंच द्वारकोष्ठपंगमन्द्रपुरेषु विलिखेद्दष्टार्मिणद्वयं। ४ सर्वतापरषट्कयुग्मधवरां व्योमासनालंगलेष्या
लिखेद्द्वजलाधिपादियुग्णांशःपत्रद्वयं तत्परं। ५ कोष्ठे ष्टष्ट यु गार्णवात्मस्तदितां युग्मस्वरांतर्गतां मायां केसर
गां दलेषु विलिखेत्तन्मूलं त्रिपंक्तिक्रमात्। त्रिःपाशांकुशवेष्ठितं लिपिभिर्वैकीतंकमाद्व्यक्रमात्। पद्मस्थेन घटेन
पंकजमुखेनावेष्टितं तद्बहिः। ६ घटार्गलमिदं यंत्रं मंत्रिणां प्राहुत्तमं मतं। पाशः श्रीशक्तिकंदर्पः कामशक्तिं दिशं
कुरा। ७ प्रथमोष्टाक्षरो मंत्रस्ततः कामनिरंजनीं। स्वाहांतोष्टाक्षरः सद्भिरपरः कीर्तितो मनुः। ८ क्लीं गौरीरुद्रदेते यो मंत्र°
योगीश्वरि सर्वमर्फट्। ९ दिद्यांतः षोडशार्णोयं मंत्रः सद्भिरुदीरितः। १ लिखित्वा भूर्जपत्रादौ यंत्रमेतद्यथाविधि। धा १७२
रयत्वामबाहौ वा कंठे वा निजमूर्द्धनि। २ वशायेसकलान्मर्त्या विशेषेण महीपतिः। लीलापदे विलिखेत्तं डंकीरुत्य

तस्तु नः। ९ प्रसाद्य प्रतिष्ठां तैर्निस्सु निर्मिता याद्दिन्यसेत्। पत्रे त्रिमधुराप्लेनि क्षिप्तेनां विधानतः। १० संपूज्य गंध
पुष्पाद्यैर्बलिं निक्षिप्य रात्रिषु। मूलमंत्रं जपेन्मंत्री नित्यमष्टसहस्रकं। ११ समाहं वांछितां नारीमाकर्षेत्स्मरविह्व
लां। भूर्जपत्रे विलिख्येतत् डंकीकृत्य तत्पुनः। १२ लाक्षयाताम्ररजतकांचनैर्वेष्टयेत्क्रमात्। तत्कुंभेन्यस्य संपूज्य यथा
वद्भुवनेश्वरीं। १३ मंत्रमयुतं जपेन्मंत्रं दिवाकरसहस्रकं। आनिषिच्य प्रियं साध्यं बध्नीयाद्यंत्रमाशिषा। १४ ध्वजांतिपु
ष्टिबलारोग्ययशांसि लभते नरः। निशौ विलिख्य तद्यंत्रे प्रजपेन्नित्यमादरात्। १५ नूतश्वेतपिशाचास्तु तेन वीक्षितु
मक्षमाः। तद्विलिख्य शिरस्याणेमाध्यते धारयन्नटः। १६ युद्धे रिपून्वलक्रूतं स्व वा जयमाप्नोति पार्थिवः। १७ अस्मार्थ
प्रथमयंत्ररचना प्रकाशोव्यक्तिः क्रीयते। पूर्वं संपुटितं चतुरस्रद्वयं। व्यक्तीकृत्वा चतुरस्रद्वयसूत्राग्राणि ऋर्गलाकारा
णि अनिमतमाना निवर्धयेत्। आम्नार्गलाग्रमंत्रयंत्रं मंत्रवाचार्योद्दरलपमेकं क्रुयात्। तथान्येत्तत्रयं त्रामयेत्। तथान्येष
ट्मालिख्य मुखं चतुर्धा मुखं पद्मं। तन्मध्ये वो र्धमुखं पद्मं लिखेत्। चतुरस्रद्वयबाह्ये संधिषु तत्र यं कुर्यात्। एवमभ्यंतर
संधिषु तत्रेत्र चतुरस्राष्टकोणानि द्विधान्तकानि भवंति तत्र अभ्यंतरे कोणकोष्ठेषु पूजो कोणगानिषडष्टकोष्ठेषु विदि

एवंसूते

रव्यतदुपरितनाष्टकोष्ठेषुपाशांकुशक्तिस्मरमन्मथशांती। गिरांकलात्मकमष्टाक्षरमेकैकशो लिखेत्॥ तद्बाह्यवहि
र्लास्यंतरोष्टकोष्टेषु कामिनिरंजिनिस्वाहेति मंत्राक्षराण्येकैकशो लिखेत्॥ अर्गलिबाह्यसंधुपरि अर्गलाग्रक्षरादधः
भुवनरपिष्टनंऊ॥ यविांत अषोडशकोष्टानिजायंते॥ तेषु शोकेयं षोडशाक्षरं॥ प्रणवगौरीरुद्रदेते यथोगेश्वरिऊं
फट्स्वाहेति षोडशाक्षरात्मकं मंत्रं एकैकशो लिखेत्॥ तद्बाह्याष्टदलानां केसरस्थानेषु सानुस्वारं चतुर्थस्वरं तत
पार्श्वयोर्द्वसमंत्रं॥ तत्पार्श्वयोः सानुस्वरमकारादिस्वरयुगलं॥ एवं स्वरयुगलं यथाक्रमं लिखेत्॥ एवं प्रतिकेसरो सप्ता
क्षराणि भवेयुरितिटीकाकाराः॥ अं क्लीं ईं क्लीं अं इत्येवं प्रकारेण प्रतिकेसरेषु पंचाक्षराणि वा लिखेत्॥ दलमध्येषु
चक्राकारेण पाशादिव्यक्षरपंक्तिक्रमेण॥ लिखेत्॥ अथ चरितायंत्रं॥ मध्ये सरोजे दशपत्रयुक्ते मायां लिखेद्धोछितस्य
भगवंतारादिवर्णं दिशपत्रसंस्थाम् दक्षिणाबीजं वसुधायरस्थं॥ २यंथस्पष्टार्थः॥ कृत्वा ग्रोहा दिशमनंव्यालचौर नयापदं मंत्र॰
विधूतंव विराघ्यंत्रं विशेषाद्विजयप्रदं॥ २इति चरितायंत्रं॥ अथ यंत्रांतरं॥ तारेंद्र विलिखेत्सरोजकुहरे साध्यान्वि १७३
धान्वितं मंत्रार्णान्वसुसंख्यकांवसुदलेष्वालिख्य तद्बाह्यतः॥ आक्रां त्रिःपरिवेष्टितं घटहृतं पद्मस्थमग्रानना॥ यंत्रंव

द्यपकरंयद्वादिनय दृतलक्ष्मीप्रदं कीर्तिदं॥ २इति पद्मावतीयंत्रं॥ अथ वनदुर्गायंत्रं॥ पद्मं सानुदलान्वितं प्रविलि
खेत्तत्कर्णिकायां भुवनं तारं शक्ति गसाध्यनाम सहितं तत्केसरेषु क्रमात्॥ महेंद्रियामनुमंनवान्युगलशो वर्णान्भु
नःपत्रगान्मंत्रार्णान्नगणशो विधाय विलिखेद्वंत्यंतदंतेदले॥ मातृकावर्णसंवीतं नूपुरद्वयमध्यगं॥ यंत्रंविंध्यनिवासि
न्याः प्रोक्तं सर्वसिद्धिदं॥ २ईत्काररं विशेषेण क्षुद्रशत्रु विनाशनं॥ राज्यदंचैवराज्ञानां वश्यदं वश्यमिच्छतां॥ ३सुता
र्थिनीनां सुतदं बहुकीर्तिफलप्रदं॥ बहुनाकिमिहोक्तेन यंत्रं तत्कामदो मणिः॥ ४अस्यार्थः॥ महिषमर्दिन्याष्टाक्षरा
णि युगलशो द्वयं द्वयं द्वादशदलेषु विलिखेद्वारत्रयं॥ मंत्राणानि द्वादशपत्रेषु वनवासिन्या गणशस्त्रीणिहीणि मंत्रा
२ क्षराणि विलिखेत्॥ एते द्वादशपत्रे चत्वारिंशंत्समाक्षराणि॥ लिखेत् एतद्यंत्रं प्रोक्तफलप्रदं भवति॥ इति वनदुर्गायंत्रं॥ अ
थ त्रिपुरभैरवीयंत्रं॥ मध्यत्रिकोणे त्रयोनिषु प्रविलिखेद्बीजानि वर्णाविंशीगायत्र्याः भुनरष्टपत्र विवरे बालिख्य त्रिशक्त्या
तांद्विर्विंबद्वितयेन मन्मथयुजाकोणे भुसंवेष्टितं यंत्रं त्रैपुरमीरितं त्रिभुवनप्रक्षोभनकं श्रीप्रदं॥ २अस्मिन्समावाह्य
सम्यक्संपूज्य देवतां॥ होमेमश्नतसंपातंजा स्तालोहत्र्यायचितं॥ ३विभूतं बाहुनायं त्रंयुद्धेषु विजयप्रदं वादेवादिजयं

कुर्यात्क विलंघुकं लंलनेत्। अश्वापुरारोग्यमित्राणि क्षेत्रान्यौत्रान् विवर्द्धयेत्। नवयोनिचक्रं संलिख्य उपरितनर्ध्वदि
शानकोणमारभ्य स्थयोनिषु मंत्रबीजानि त्रीणि यथाक्रमं पुनः पुनः लिखेत्। तदुपरि वृत्तद्वयं तत्कोणेषु मन्मथ
बीजं लिखेत्। एतत् यंत्रं प्रोक्तफलदं भवति। इति त्रिपुरभैरवीयंत्रं॥ अथ महागणपतिमंत्रं॥ बीजं षट्कोणमध्ये स्फुर
द्दनल पुरे तारं गं दिक्षु लक्ष्मीमायाकंदर्पश्रीमत्तदनुरसपुटैर्व्याप्तं लिखेद्बीजषट्कं। तत्संधिष्वंगमंत्रान् वसुदलकम
लेमूलमंत्रस्य वर्णान् शिष्टान् पत्रेषु विद्वान् गुणशः इह लिखे धान्यमन्ये पलाशो। श्वाबीतं लिपिभिः क्रमात् कमठवशाद्भूप
शां कुशान्यामपि स्वागेहक्षितये वेष्टितमिदं यंत्रं गणाधीशितुः। लाक्षाकुंकुमरोचनामृगमदैर्द्भूर्जे वरे हेम्नि वा संलिख्यानि
वहेतमेतं सकलैस्सं प्रार्थनायां श्रियं। अस्यार्थः। त्रिकोणं विलिख्य तन्मध्ये बीजं तद्बहिः षट्कोणं तद्बहिः त्रिकोणं तद्बहिः चतुर्दि
क्षु यथाक्रमं श्रीं ह्रीं क्लीं ग्लौं इति विलिखेत्। कोणकक्षेषु प्रणवादिषु बीजानि लिखेत्। कोणसंधिष्वंगमंत्रान् तदुपरि अष्ट मंत्र॰
दलं कमलं परिकल्प तत्पत्रेषु त्रयस्त्रयः मंत्रार्णान् अवशिष्टान् तत्पत्रेण तद्बहिरनुलोमप्रतिलोमलिपिं वेष्टयेत्। २३४
तदुपरि पाशांकुशाभ्यां तदुपरि बिंबाभ्यां वेष्टयेत्। इति महागणपतियंत्रं॥ अथ रामयंत्रं॥ तारं मध्ये विलिख्य तमनु

षट्कोणेषु संधिष्वंगं मायास्मरमपि विलिखेत्कोणगंडेषु पश्चात्॥ किंजल्केषु स्वरगणमथो मंत्रमध्येषु मालामं
त्रोक्तान् गुणान् गुहमितवमितानष्टमे पंचवर्णान् दशाक्षरेण संवेष्ट्य कादिवर्णैश्च भूपरे। दिग्विदिक्षु लिखेच्छालं ना
रसिंहवराहयोः अपादिस्माष्टितं यंत्रं स्वर्णपत्रे विनिर्मितं। बहुना विधृतं दद्याद्धि जयश्रीपराक्रमं॥ इगदितं रामयंत्र
स्य विधानं सुनिश्चितं। अस्यार्थः। षट्कोणमध्ये प्रणवं तन्मध्ये साध्यं। षट्कोणेषु मंत्रवर्णान् संधिष्वंगमंत्रान् कोणगंड
योः प्रत्येकं श्रीलेखाबीजं। कामबीजं च लिखेत्। तदुपरि अष्टदलं पर्यंतं केसरेषु प्रत्येकं युग्मस्वराः। पत्रेषु प्रत्येकं मा
लामंत्रस्य षट्षट् वर्णान् अष्टमे दले पंचवर्णान्। मालामंत्रो यथा। ॐ नमो भगवते रघुनंदनाय रक्षोघ्नविशदाय मधु
रप्रसन्नवदनाय अमिततेजसे बलाय रामाय विष्णवे नमः। तदुपरि दशाक्षरेण मंत्रेणावेष्टयेत्। तद्यथा। ॐ जानकी
वल्लभाय स्वाहा। तदुपरि कादिवर्णैः पश्चाद्भूपुरेण वेष्टयेत्। दिक्षु वाराहबीजं। कोणेषु नृसिंहबीजं। इति रामयंत्रं॥ अ
थ वाराहयंत्रं॥ मध्ये बीजं सतारं दहनपुरयुगे चक्रवर्णान् षडस्त्रं विलिख्यांगानि संधिष्वथ करणदलैरंबुजं केस
रेषु अष्टार्णान् पत्रमध्ये लिखतु वसुमितान्मंत्रवर्णांश्चतुर्थे। शिष्टं पत्रे पुरस्तात्सुदलदलके केसरस्थस्वराढ्ये॥ मं

त्रार्णान्वेदसंख्यानु दलमथ विलिखेदन्यमन्येषु बाह्ये किंजल्के कादिवर्णान्विकसितकमले षोडशारे यथावत्। मंत्रार्णा
न्युग्मसंख्यान्दलमथ लग॰ तं शिष्टवर्णान्लिखित्वा तारस्थाकालबीजैस्तदनु परिवृतैः साध्यनामादिमध्ये। २ दविनिम्साध्यना
मा ऐं मैं त्रैवर्णैर्वृतं बहिः। त्रिर्विवेनास्य कोणेषु च बीजं साध्यसंयुतं। ३ अष्टपत्रेषु वाराहं च बीजसहितं लिखेत्। मायावृ
त्तं बिंदुगगनं बीजं वाराहमीरितं। ४ रोचनागरुकस्तूरीलाजाकुंकुमचंदनैः। गोमयांभसिसंपिष्टैर्लिखेद्यंत्रं शुभे दिने। ५
लिखित्वा हेममय्या च मंत्री कामप्रसिद्धये। भूर्जपत्रे निजेच्छास्य सो मेन्नसिद्धये लिखेत्। जपपूजादिभिः सिद्धं यंत्रं कं
यान्त्रिजप्तितं। ६ ग्रामपत्तनराज्येषु यंत्रमेतत्सुसाधितं। निखनेत्सुनवा रादौ सांगं दिक्षु समर्चयेत्। ७ तस्य तापमृत्यु
चौरादिभूतव्यालमहाग्रहैः। न स्याद्भयं पदं द्वष्टुं तं देशं देवताबलात्। ८ अस्यार्थः। साध्यसाध्यः। षट्कोणं द्वहिश्चतुर्द
लं कोणेषु चक्राकारं सरालि संधिषु षडंगानि चतुःपत्रेषु नारायणाष्टाक्षरद्वयं द्वयं पत्रेषु वाराहमंत्रस्य चतुर मंत्र॰
श्चतुरः तद्बाह्ये षोडशदलं तत्केसरेषु कादिमांतं द्वंद्वशः। पत्रेषु वर्णद्वयं द्वयं। तदुपरि त्रिणवत्र॰ बीजैः साध्यसूत्र १७५
र्भैः ततो मंत्राक्षरैः क्लीं बीजेन। साध्येन सा बीजे कोणेन वेष्टितं। अष्टबीजं सत्र्च बीजं लिखेत्। इति वाराहयंत्रं। अथ चक्रे

यंत्रं॥ षट्कोणमध्ये विलिखेत्समाध्यं तारं षडस्रेष्वथ शिष्टवर्णान्। अंगानि तत्संधिषु चाथ षोडशारं सषोडशार्णैर्
विधिवत्पुरस्तं। १ जपित्वा हतमंतापं गर्भिणीनां सुतप्रदं। अनिवारग्रहोन्मादं यंत्रमेतद्विनाशयेत्। ३ अस्यार्थः। ष
ट्कोणं तन्मध्ये प्रणवं ससाध्यं गनेटिकारं कोणेषु मंत्रवर्णषट्कं। संधिषु गर्भमंत्रान्उपरि षोडशपत्रकमलं तत्पु
रस्याह तं। षोडशस्वरवर्णान् षोडशदलेषु। ॐ नमो भगवते महासुदर्शनाय हुं फट् इति षोडशाक्षरं। इति चक्रयंत्रं।
अथाभिषेकमाह॥ पाषाणाक्षीरवृक्षाणां त्वचो मलयजं पुरं। कुंकुमं यामिनी कुष्ठं बिल्वापामार्गसिर्षपान्। इति स
र्वायवादेविन्नलक्ष्मीसु गजांकुशं। लक्ष्मी गोरोचनां पद्मवचां गोमयसंयुतां। १ विष्णुक्रांतामर्कयुतां जपन्यंत्रं विनि
क्षिपेत्। पंचगव्येन संपूर्णपात्रे तत्संस्कृतेन ले। अभिस्थाप्य काथ्येनावद्यावद्भस्म न विष्यति। तदा यजपेद्भूयः श्रु
तं देवताधिया। अभिषिंचेत्सर्वांगमेतेन किंचिच्छिरसि निक्षिपेत्। सत्याद्रोह ग्रहोन्मादव्याधिदुःखनिवारणं। पसर्वशा
त्रुग्रामनं सर्वपापहरं परं। श्रुत्वेदं वस्प दंश्मं सांसमस्त्रापन्निवारणं। इति निर्गीवस्तरूश्यानां विशेषेण प्रपस्यते। अ
स्मात्परतरा रक्षा नास्ति लोके प्रकीर्तिता। ७ मलयजं चंदनं। परं गुग्गुलं। यामिनी हरिद्रा। देवसदेवी लक्ष्मी बिल्वं।

एतत्सर्वं पंचगव्यं श्लोकैकं नैव निक्षिपेत्। प्रयुतं तदशांशं तं जुहुयाद्वा॥ पंचगव्य घृत प्रकारमाह। मुस्ता षष्टी निशा वह्निरेला यष्टि
रवार्तषा। पाठा विडंगमंजिष्ठा त्राता देवी सरोहिणी। फलत्रयं च तैः कल्कैः पंचगव्येषु मिश्रितैः। प्रस्थं पिबेद्यथानाथ मंत्रेण
नेनमाधितं। शांति दं सुतदं स्त्रीणां घृतमेतन्मयापहं॥ गंधर्वरक्षाकरं स्कंदं पंचगव्यं घृतं विदुः। मुस्तामोथ। निशा हरिद्रा।
वह्निश्चित्रकः। मूर्वं। यष्टिमधु। रोहिणी कटु। फलत्रयं त्रिफला। प्रस्थपरिमितं घृतं सम्यक् पाचयेत् मंत्रसाधितं शुक्र फ
लप्रदं भवति। इति चित्रनिषेक पंचगव्य प्रकारः। अथ काम्ययंत्रं॥ कामो वा स्मित साध्यमंगविलसत्षट्कोणमेतद्बहिर्गायित्री
गुणवर्ण विह्वसु दलं मायामनोरक्तको। षट्सत्स्वैः सहिताष्टपत्रसहितं द्रोणी पुरेणावृतं। कोणान्यस्तमनोभवेन कथि
तं यंत्रं जगन्मोहनं। अस्यार्थः। षट्कोणं विलिख्य तन्मध्ये कामबीजं। षट्कोणे परितः अष्टदलं। प्रतिपत्रे भूमा जामंत्रारे हे
षट्कं। ततो भूपुरं। सकामबीजं। वश्यार्थे धारयेदेतत् यंत्रं यंत्रप्रकरणे प्रतिपादितयंत्रं। शलांगिते वह्नि पुरारव्य युग्म धूमा मंत्र०
वतीतत्र लिखेत् क्रमेण। मध्यादिकोणेषु मरुद्यहार्थ यंत्रं ऊं तारान्नलवह्नि बीजं। रंतो सर्वैसिविद्धं तौ वाजे धूमावतीत्र १७६
कः। धूमावतीमिति प्रोक्तः शत्रु निग्रहकारकः॥ विषेणाकनकां वो निः प्रेतकर्पटके कल्पितं। स्मशाने निखनेदेतत् शत्रु

[illegible] मुखाद्ध्ये ऊंवं। अस्यार्थः। तत्कोणे धूमावती मंत्रं लिखेत्। एकैकाक्षरी बहिर्वायु ग्रहेण वेष्टयेत्। त
तो रकारेण बहिर्विकारेण। प्रेतवस्त्रे धत्तूरकरसेन काकपक्षलेखिन्या लिखितास्मशाने रात्रौ निखनेत्। शत्रो रुच्चाट
नं भवति। तामालिख्य मकारको ष्ठयुगले कोणेषु तस्या लिखेत्। मंत्रं तोऽजनांतकारसहितां धूमावतीपञ्चगां बीजं पस्तु।
टिकादिना परमिदं वायुत्रिगेहावृतं यंत्रं प्रातः सुरेतन्नमिनिहितं विद्वेषणं स्यात् द्विषः। अस्यार्थः। अष्टदलकमलं सच्चा
तन्मध्ये मकारं तत्को ष्ठद्वये साध्यं मकारको ष्ठचतुष्टये ऊं जाणानां स्थान्पत्रेषु धूमावतीं बहिर्घटिकादिना वे
ष्टयेत्। प्रेतवस्त्रेण धत्तूरकरसेन काकपक्षलेखिन्या लिखेत्। स्मशाने निहितं विद्वेषकरं भवति। एकाशीतिपदे
षु मध्यदहने साध्यं लिखेद्दंडभनः सुंश्रुं पुमिति दिग्गा तासु विलिखेद्द्वीजानि पत्तेष्यपि॥ शिष्टे श्रीचानिशाक्षरादि विलिखेत्का
लीमन्त्र पंक्तिशः तद्वाक्येयमवीतमग्निपवनां वीतं च यंत्रं लिखेत्। लिखेद्दष्टविषांगार निंबनिर्यासकज्जलैः॥ निग्र
हाख्यमिदं चक्रं काकपक्षेन कर्पटे। विनीतवद्रवल्मीक स्मशाने वा चतुष्पथे। दक्षिणे नले मंत्री निखनेद्दर्द्धरात्रके॥
नसाद्दावशत्रुरेते नमः वधामरणं व्रजेत्। निग्रहीतमहारोगैः पतितो वा न वेदसो। धात्रीछाया। मिष्टिका यां वा सक्रमेत

स्त्रकल्पितं। मर्कटी विषदंडी। निःसमालिख्य मध्ये मुखं। ५ यत्र रात्रौ स्वने त्वत्र त्वयो नृयो स्तुमं वदेत्। अस्य पावः श्वर्मेवप
त्रे। आरव्यां डं बर मध्यतः स्मरगतामालिख्य जं नादिकां विद्यां दिग्गत पत्रकेष्व विलिखेत् देवी दलेषु स्मरं। कोणस्थे
षु सनामकं बहिरहः पाशांकुशाभ्यां युतं यंत्रं वश्यकरं गृहादिनयद्भुत ह्रु शनिचारापहो। अस्यार्थः। अष्टदलपद्म
मध्ये तुं बरं बीजं ततः कामबीजं ततः साध्यं दिकात्रेषु जं ने जं भिनि स्वाहा। अं श्वेत्रं धिनिस्वाहा। रूं धेरूं धिनिस्वाहा। सर्वत्र।
मृत्युंजययंत्रं॥ स्फुटीकृते भूमिपुरस्य युग्मे मायां लिखेन्मन्मथसाध्यगर्भां। चकारगर्भेण महीपुटेन संवेष्टितं वश्य
करं तडन्वैः। २ द्वितीयं। मध्ये साध्यविदर्भितं त्रिपुटितं मृत्युंजयत्र्यक्षरैः ज्ञांतस्थं निजसाध्यनाम विलिखेत् किंजल्कसं
स्थान् सुरान्। पत्रेष्वष्टसु नाममंत्रपुटितं वर्गास्तिदर्थेष्व थो यंत्रं पद्मपुटीकृतं निगदितं मृत्युंजयाख्यं परं। ३ विषवैरशि
रोरोगनाशनं श्रीजयप्रदं। कांतिपुष्टिप्रदं वश्यं सर्वकार्यार्थसिद्धिदं। ४ अष्टदलकमले षु मरकेसरं स्वातकर्णिकायांष मंत्र॰
कारं तन्मध्ये साध्यविदर्भितं साध्यनाम। मृत्युंजय त्रिपुटितं लिखित्वा पत्रेष्वष्टसु त्र्यक्षरपुटितं नाम लिखेत्। पत्राग्रे १७७
ष्ववर्णान्। अधउपरि पद्मद्वयेन पुटितं यंत्रमुक्तफलप्रदं भवति। इति मृत्युंजययंत्रं। ॐकारमावादिषु मेरवलौ वधोमनं

दन्यग्रहस्य मध्ये युग्मेन कोणेषु विलिख्य तूर्जेयंत्रं विस्थातरिपुनागहारि। अस्यार्थः। वह्निगेहयुग्मं लिखित्वा मध्ये ॐ
कारकोणेषु क्रीं मे रवले स्वाहा। इति लिखेत्। विहाय बीजं। टकारं मकारं। तत्रस्थं लिखेत्। षकारेणावृतं तन्त्रयो भूमिमं
डलमध्यगं। लकारे बिंदुसंयुक्ते वेष्टितं तन्दहिःक्रमात्। स्मर्गीत मातृकाबीजं सर्वबीजेन वेष्टितं। कोद्येयकर्पटे क्लि
न्नमिष्टयंत्रं समाधयगां। २ सेनाग्रे निखनेदेतत्स्तंभनं कुरुते ध्रुवं। ३ सैन्यस्तंभनं। मध्ये श्री नरसिंहबीजमथ तद्वाह्ये स्वरान् केस
रेवारां द्विकुयमेंद्र केषु विलिखेत् मध्ये मनुं गारुडं। मध्यस्थं समरुद्दग्निनैरृति शिवेष्वा लिख्य पवर्गावृतं। यंत्रं सर्गि भिरिष्ट
निःपरिवृतं सवर्णकेगारुडं। अत्र सिंहबीजं स्वराः केसरेषु। पश्चिमोत्तरयाम्यपूर्वपत्रेषु डा रूडं पत्रं। वाय्वग्निशिवपत्रेषु यं रं
लं वं इति। बहिर्वाराहेतत्तदहि। अष्ट निक्षकरे वेष्टयेत्। एतद्यंत्रं धारयतः पन्नगपतत्यः सर्वविषं नाशायति। इति गारुडं
यंत्रं॥ अथ कामयंत्रं। साध्याख्या पुटितं स्मरैरपि ह्रंकारेण लिखेन्मंत्रतः। पश्चात्तारविकारपस्तमपरां नाशाय चंडी शि
खान्। अष्टाष्टाष्टदलेषु साधु विलिखेत्तांबूलपत्रोदरे यंत्रं तत्त्रिशिखाद्दयेत् तज्जपं वश्यपोभवेत्तत्त्वसः। अस्यार्थः। अ
ष्टदलं पद्मं तांबूलोदरे लिखित्वा तन्मध्ये कामबीजं साध्यनामाक्षरपुटितं कामबीजैस्त्रिवेष्टयेत्। पश्चादष्टपत्रेषु प्रत्येकं व

१ कर्य

ह्रसमाणबीजानि लिखेत्। तारः। ॐकारः ॐ आं खं ङं क्रं ऐं यं अष्टदलाग्रेषु शूलानि। एतद्यंत्रं वश्यकरं। इति कामयंत्रं॥ अथ गो
विंदयंत्रं॥ प्राक्प्रत्यग्दक्षिणोदग्विधिवद् निलिखेत् तस्य रेखाः चतुष्कोणाद्यं बहुलयुक्तं छलययुगयुतं मध्यकोष्ठे तदं
तः लोकस्याग्निपुरस्तात् वसुपदविवरेष्वष्टपत्रं लिखित्वा तद्बाह्ये द्वादशारैः स्फुरितदलपरिस्फुरितं देवकीपुत्रयंत्रं॥ ३ लिखितं
भूर्जपत्रादौ यंत्रमेतद्यथाविधि। विधृतं बाहुना यंत्रं सर्वकामफलप्रदं। ४ पलाशाष्टदलफलके लिखितं साधुसाधितं। गोरो
चनेनिखनेद् देतत् वांछितं सिद्धिर्भवेत्सदा। ३। श्रीमायास्मरकूर्चमंत्रं विलिखेन्मध्ये दलेष्वष्टसु दिक्प्रोक्तं बटुकाय शीघ्रमपरान्मंत्रस्य
वर्णान्बहिः अष्टद्वंद्वदलेषु यद्बहिरधस्तत्संख्यपत्रेष्वथो द्वात्रिंशद्दलकादिमांतमादितं यंत्रं लिखेत् भूपुरे। ४ आपदुद्धा
रणं यंत्रमत्र प्रस्तुतमयापहं। सर्वसंपत्करं नित्यं सर्वसौख्यप्रदायकं। ४ रत्नाकरं नयाद्यानां राज्ञां विजयवर्द्धनं। आपदुद्धारणा
ह्रस्मादापदुद्धारणं नमः। ३ तंत्रेषु नास्तिमंत्रोऽन्यः इत्याऽऽस्तंत्रवादिनः। अस्यार्थः। अष्टपत्रं पद्मं लब्धा श्रीमायाकारकूटानि मंत्रः
बीजानि न्यस्त्वा लिखेत्। अष्टपत्रेषु बटुकायेति। एकैकाक्षरं द्विशो लिखेत्। बहिः षोडशदलेषु बशिष्टार्णवर्णान्। तद्बहिः १७८
षोडशदलेषु स्वरान्। द्वात्रिंशद्दलेषु सांताकारादीनि। तद्बहिस्सत्रिशूलं। भूपुरमित्यापदुद्धारयंत्रं॥ षट्कोणेशः क्रिरंतः

स्फुरयुगलवृता प्रस्फुर द्वंद्व कोणे शिष्टैर्मंत्रस्य वर्णैरखकरण चतुःषट् चतुर्वेदवेदैः। षड्भिः क्रमान्त्र यंत्रं दहनज्व
रसुगेनापि संवर्मलिप्त्यां राजत्कोणेन वीतं भरणि पुरगतं यंत्रमाघोरमेतत्। १ लुद्रचोरग्रहव्यालज्वरतापस्मारनाश
नं। यंत्रमेतत्समाख्यातं सर्वसिद्धिप्रदायकं। २ अस्यार्थः। षट्कोणं विरच्य मध्ये तु वनेश्वरीबीजं मंत्रस्य स्फुरयुगला
रैर्वेष्टितं लिखेत्। षट्कोणे प्रस्फुर प्रस्फुरेति लिखेत्। अष्टपत्रेषु ग्रंथोक्तसंख्याकान्मंत्रवर्णान्। तद्बहिः पिठनः षट्
तत्रास ५ कोणं अग्निपूर्व कोणं घुफडिति लिखेत्। तद्बहिर्भूमंडलेन वेष्टयेत्। एतदघोरयंत्रमुक्तफलदं भवति॥ इति यंत्राणि॥ अथ ले
ख्यद्रव्याणि॥ काश्मीररोचनालाक्षामृगेनमदचंदनैः। विलिखेत् हेमलेखिन्या यंत्राण्येतानि देशिकः। १ भूमिस्थं भस्मशाव
स्थं दग्धं निर्माल्यसंगतं। विशीर्णं लिखितं यंत्रं यंत्रं ज्ञात्वा न धारयेत्। २ अथ यंत्ररूपाणि। दीक्षायां पयुक्तानि सर्वतोभद्रनव
नाभपंचाब्जानि मंडलानि लिख्यंते। सर्वतोभद्रं यथा। चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते। चतुर्ष्वपि च कोणेषु दद्यात्सूत्र
चतुष्टयं। पूर्वपश्चिमकोणकोष्ठेषु कर्णसूत्राणि पातयेत्। तद्वत्तेषु मत्स्येषु दद्यात्सूत्रचतुष्टयं। मध्ये मध्ये यथा मत्स्यावैतेयुः
पातयेत् दशद्वीपरायतेदृढं मंत्री यामद्वार समाचरे। २ ततः कोष्ठेषु मत्स्यास्युस्तेषु सूत्राणि पातयेत्। यावच्च तद्वयं मंत्री

षड्वंचाग्न्यादान्यपि। तावत्तेनैव विधिना तत्र सूत्राणि पातयेत्।५ षट्त्रिंशत्तापदैर्मध्ये लिखेत्पद्मं चलक्षणं। बहिः पद्मा
त्र वेत्थीवं पंक्तियुग्मेन वीथिकां।६ द्वारशोभोपशोभानां शिष्टान्यापरिकल्पयेत्। शास्त्रोक्तविधिना मंत्री ततः पद्मं समालि
खेत्।७ पद्मं क्षेत्रस्य संन्यस्य षोडशांशं बहिः सुधीः। तन्मध्ये विन्यजेद्वृत्तैस्त्रिभिः समविभागतः।८ आद्यस्या कर्णिकास्थानं के
सरेण द्वितीयकं। तृतीयं तत्र पत्राणां सुकोणेन दशार्द्धकं।९ बाह्यवृत्तांतरालं च मानं यद्विधिना सुधीः। विधाय केसरा
ग्रेषु परितो र्धनिशाकरात्।१० लिखित्वा संधिसंस्थानि तत्र सूत्राणि पातयेत्। दलाग्राण्यंजयेन्मानं तन्मानं वृत्तमालिखे
त्।११ तदंतरालं तन्मध्ये सूत्रं न्योन्यतः सुधीः। प्राग्लिखेद्बाह्य हस्तेन दलाग्राणि समं ततः।१२ दलमूलेषु युगशः केसराणि प्र
कल्पयेत्। एतत्साधारणं प्रोक्तं पंकजेलवादिभिः।१३ पदानि त्रीणि पादार्थं पीठकोणेषु मार्जयेत्। अवशिष्टैः पदैर्विद्वान्
पीठगात्राणि कल्पयेत्।१४ पदानि वीथिसंस्थानि मार्जयित्वा पंक्तयेन दलः। दिक्षु द्वाराणि रचयेत्तद्विचतुःकोष्ठकैस्तथा।१५ मंत्र: १७९
पदैस्त्रिभिस्तिरश्चैवाउपशोभां स्तु वरिपार्श्वतः। उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनंतरं।१६ अवशिष्टैः पदैः षड्भिः कोणानां साच
तुष्टयां। रंजयेत्सर्वनिर्वर्णैर्मंडलं तन्मनोहरं।१७ पीतं हरिद्रा वर्णं स्यात्श्वेतं तंडुलसंभवं। कुसुंभवर्णमरुणं रूक्षं दग्धयु

त्वा कज्जलं।१८ बिल्वादिपत्रकं श्यामं स्युरुक्तं पंचवर्णकं। अंगुलोत्सेधविस्तारा सीमा रेखाः सिताः शुभाः।१९ कर्णिकायां
पीतवर्णैः केसराण्यरुणेन च। शुक्लवर्णेन पत्राणि तत्संधिं श्यामलेन च।२० रजसा रंजयेन्मंत्री यद्वा पीतेन कर्णिकां।
केसरा पीतरक्ताः स्युररुणानि दलान्यपि।२१ संधयः कृष्णवर्णाः स्युः पीतेनाथ सितेन वा। रंजयेत्पीठगात्राणि पादास्तु
ररुणप्रभाः।२२ गात्राणि तस्य शुक्लानि वीथिषु चतसृष्वपि। आलिखेत्कल्पलतिकां दलपुष्पफलान्विताः।२३ वर्णैर्नानाविधै
श्चित्रा सर्वादृष्टिमनोहराः। द्वाराणि श्वेतवर्णानि शोभा रक्ता समीरिता।२४ उपशोभा पीतवर्णा कोणान्यसितानि च। तिस्रो
रेखा बहिः कार्याः सितरक्तासिताः क्रमात्।२५ मंडलं सर्वतोभद्रमेतत्साधारणं स्मृतं। अस्यार्थः। उक्तप्रकारेण पूर्वपश्चिमाय
ताः उत्तरदक्षिणायताश्च समसप्तदशरेखाः समकोष्ठा कार्याः। मध्यस्थषट्त्रिंशद्भिः कोष्ठैः पद्मं लिखेत्। पद्मकर्णिका पीता केस
रा अरुणानि पत्राणि शुक्लानि वंधयो सितवर्णाः पीतगर्भाः पीता असिताः। पद्मोपरि पंक्त्यैकेन पीठं कार्यं त्रिभिस्त्रिभिः कोष्ठैः पी
ठपदाः। अरुणाः कोष्ठचतुष्टयं चालं षड्भिः कोष्ठैः कार्यं। तत्समीपस्थत्रकोष्ठत्रयेण तद्दैर्ध्येन एकेन च पीतोपशोभाः कार्याः। ए
वमरुणाः शोभा कार्याः। द्वाराणि चतुर्भिः कोष्ठैः। द्वारस्यां च श्वेतवर्णानि कार्याणि। एवं च दिक्षु बोध्यम्। अथागतं ततो मंडलाद्बहिस्ति

पीठरेखाः श्वेता रक्तगन्धाः कार्याः एवं सर्वतोभद्रमण्डलं मनोहरं संपद्यते॥ अथ नवनाभमण्डलं कथ्यते। चतुरस्रे चतुःषष्टिपा
दात्मकं रचयेत्सुधीः। पादेषु तु निःपद्मं स्यान्मध्ये तत्परितः षु नवा। वीथीश्च तस्मै कुर्वीत मण्डलान्तावसानिका। दिग्गतेषु चतुष्क
कमालिख्य समालिखेत्। विदिग्गते चतुष्कोणं त्रिधा षोडशधा सुधीः। मार्जयेत्स्वस्तिकाकारं श्वेतपीतारुणासितैः॥
रजोभिः पूरयेत्तानि स्वस्तिकानि मिरादतः। प्राक्प्रोक्तेनैव मार्गेण शेषमन्यत्समापयेत्। अथ नवनाभमिदं प्रोक्तं मण्डलं सर्वसि
द्धिदं। प्रयोगसारे पूर्वपश्चिमायता नवरेखाः समाः कार्याः। तथोत्तरायता नवरेखाः। एवं चतुरस्रे सम्यक् चतुःषष्टिकोष्ठा
त्मकं संपद्यते। तस्य कोणस्य कोष्ठचतुष्टयं त्रिधा षोडशधा कार्या। षोडशकोष्ठमध्ये त्रिभिः कोष्ठैरेकेन लिंगाकारं संपद्यते॥
तथैव त्रयमपि एवं स्वस्तिके कोणचतुष्टयं कार्यं। दिक्षु पद्मचतुष्टयं मध्ये मध्यस्थे कोणचतुष्टये। एकेन पद्मं त्र्यवशिष्टकोष्ठ
पंक्तिभिः वीथीचतुष्टयं सीमान्तं कार्यं। एवं नवनाभमण्डलं भवति॥ अथ पंचाब्जं॥ पंचाब्जमण्डलं प्रोक्तमेतत्स्वस्तिकवर्जितं। मंत्र·
देशायां देवशजायां मंडलानां चतुष्टयं। स्वस्तिकस्थानकोणचतुष्टये वर्त्तिकाः स्मरणं चतुरस्रं कार्यं। वीथ्यश्च तस्य कार्याः। १८७
चतुरस्रे पुरे त्रिधा विभज्योत्तरदक्षधा सुधीः। पातयेत्तत्र सूत्राणि कोष्ठानां दशपंचाशतं। चतुष्षष्टिचारिंशदूर्ध्वपश्चात्प दिक्षु तां बु

जं कोष्ठैः प्रकल्पयेत्पीठं पंक्त्यानेनात्र वीथिका। द्वाराणि शोभा यथा सर्वं तु पशोभानां दश्यते। अवशिष्टैः पदैः कुर्यात् ख्रिद्विः
कोष्ठानि मंत्रवित्। विदध्यात्सर्वविच्छेदं एवं वा मंडलं स्मृतं। पद्मतिपंचाब्जं॥ इति श्रीमद्दाक्षिणात्यत्रिपाठीसंगृहीते मंत्रको
शे यंत्रादिकथनं नाम एकोनविंशः परिच्छेदः॥ ॥अथ मुद्रासमालिकाः कथ्यन्ते॥ तत्र काश्चित् मुद्रा लिख्यन्ते। तत्र प्रथमा
दौ आवाहनादिमुद्राः। अधोमुखीकृतौ प्रसरनिविडांगुलिकौ अंगुष्ठाग्रसंलीनाकुंचिततर्जन्यग्रौ अंगुष्ठनागौ पाणी परस्पर
संश्लिष्टौ नाम नामुद्रा तु पदेशात् देवतानां वनायां कार्यांतित आवाहनादिका पञ्चमुद्राः प्रदर्श्यन्ते। आवाहनमुद्रया आवा
ह्य स्थापनमुद्रया संस्थाप्य सन्निरोधनमुद्रया संनिरुध्य। अवगुंठनमुद्रया अवगुंठ्य सन्निधापनमुद्रया सन्निधापये
त्। एताः सर्वसाधारणाः। आवाहनं नाम स्ववर्गतस्य देवस्य स्थानविशेषे संयोजनं। स्थापनं नाम आनीय प्रदेशो उपवेशनं।
संनिरोधनं नाम मूर्त्तिर्विशेषे देवताचिरावस्थानप्रार्थना। अवगुंठनं नाम उपचारस्वीकरणप्रार्थना। तद्यथा। उत्ता
नौ प्रसृतसंसृष्टांगुलिकौ तर्जनीमूलसंस्पृष्टानतांगुष्ठाग्रौ मध्यमाद्यपवर्तितसंपीडितानततर्जन्यौ। दोर्द्वयप्रकुंचितस
र्वांगुलिका आवाहनमुद्रा। अनया पुष्पयाच्यावाहनं कार्यं। अर्द्धनतांगुष्ठौ संश्लिष्टांगुष्ठनागौ करौ स्थापनमुद्रा। परस्प

रसंश्लिष्टौ निम्नांतर्गतांगुष्ठौ मुष्टिकौ निरोधनमुद्रा ॥ ईषद्वक्रसहितांगुष्ठकौ अवगुंठनतटनपरौ अवगुंठनमुद्रा ॥ अंगुष्ठमुष्
यासं निधापयेत् ॥ ऋजुं मध्यमांगुलिं स्वां तर्जनीं च मध्यमपर्वसंसृष्टां वक्रीकृतां संपादयेद्वा तथा चांकुशमुद्रा स्यात् ॥ अथ पृ
ष्ठां यो निमुद्रां देवस्य हृदयादौ मां निधकारिणीं प्रदर्शयेत् ॥ वामानामिकोपरि पृष्ठनागेनानामिकांता निक्षिप्य तर्जनीस्थी
तदग्रे दृढी वा तदुपरि अंगुष्ठद्वयं निक्षिप्य योनिमुद्रां बध्नीयात् ॥ ततः उपसंहारमुद्रया स्वहृदि उपसंहरेत् ॥ करपृष्ठ
नागे संश्लिष्टौ हृद्वा परस्परांकुचितांगुलिकौ अधोमार्गेण स्थापयेत् ॥ एषोपसंहारमुद्रा ॥ अथ विशेषमुद्रा ॥ तत्र दे
वतापूजायां कार्या ॥ अथ चक्रादिमुद्रा कार्या ॥ चक्रादिमुद्रा ॥ तलेन परस्परप्रसारितांगुलिकौ विपर्यस्तमुखौ संयोज्य द
क्षिणांगुष्ठाग्रेण सम्यक्कनिष्ठाग्रं संयोज्य मध्यांगुष्ठाग्रेण दक्षिणकनिष्ठाग्रं संयोज्य दक्षिणनागे स्कंधादुपरि आदक्षि
णेन भ्राम्यमाना सुदर्शनमुद्रा ॥ दक्षिणांगुष्ठमध्यांगुष्ठवत्रकमुष्टिना गृहीत्वा मध्यमांगुष्ठमूर्ध्वं निप्रसार्य दक्षिणां मंत्र
गुलिनिश्चूतष्टनिस्सहिता निःऊर्ध्वीकृता निःसंयोज्य वामपार्श्वमाध्यपार्श्वं संप्रदर्श्यमाना संमुखमुद्रा ॥ ततो हस्तौ परस्प १८१
रं संयोज्य परस्परमंगुलिविवरे ष्वंगुलीर्विक्षिप्य मुष्टिं श्लिष्टौ हृद्वा वाममध्यमांगुलिद्वयं संमुखं संस्पृष्टमूर्ध्वं प्रसार्य वामोकृत्वा

गेमूलनागे तिर्यक्प्रदर्श्यमाना कौमोदकी ॥ मणिबंधौ परस्परं संयोज्य विकसितपद्मदलवदष्टांगुलांकुचिताग्रा समंता
त्प्रसार्यांगुष्ठौ पार्श्वयोः संयोज्य मध्यतः कर्णिकावदाकुंचयित्वा दक्षिणे ऊर्ध्वं मूलनागे ऊर्ध्वं प्रदर्श्यमाना पद्ममुद्रा ॥ दक्षि
णहस्ततलं निबिडांगुलिचतुष्कं प्रसार्य वामांगुलिचतुष्कोणान्नवमध्ये परस्थमुद्रा ॥ दक्षिणहस्तमध्यमांगुष्ठे प्रसार्य किं
चिदाकुंचिते कनिष्ठिका तर्जन्यौ ऊर्ध्वीकृत्य मृगास्यवत् मृगमुद्रा ॥ अनयवरौ प्रसिद्धौ ॥ कनिष्ठांगुलिकौ सक्तौ करयो
रितरेतरां ॥ तर्जनीमध्यमानामा संहतांगुष्ठवर्जिता ॥ मुद्रेयं गालिनी प्रोक्ता रवस्योपरिवार्चिता ॥ अथ षडंगमुद्रा ॥
अनांगुष्ठ नरसजवो हस्तशाखा नवेन्मुद्रा हृदये शीर्षिके च ॥ अधोगुष्ठा खल्व मुष्टिशिखायां करद्वंद्वांगुलयो वर्मणि स्युः
नाराचमुष्ट्युद्धृतबाहुयुग्मकांगुष्ठतर्जन्युदितो ध्वनिस्तु ॥ विश्वक् विषक्का कथितो स्त्रमुद्राय त्राक्षिणी तर्जनीमध्य
मे तु ॥ ऊर्ध्वं वामकरांगुष्ठे मध्यमस्य कनिष्ठिका ॥ दक्षिणांगुष्ठसंसक्ता तत्कनिष्ठा प्रसारिता ॥ तर्जनीमध्यमानामाः किंचि
त्संकुंच्य चालिता ॥ रेणुमुद्रेह कथिता सम्प्रेयसी हरेः ॥ मालाश्रीवत्सकौस्तुभाः प्रसिद्धा एवा अंगुष्ठं वाममुद्दंडि
तमितरेतरांगुष्ठकेनाथ बध्वा पश्चात्तां पीडयित्वांगुलिनिरपचितां वामहस्तांगुलीनां बध्वागाढं हृदिश्रयत्रवि

मलधीयादस्व कामबीजं विच्चारव्या मुद्रे केशास्फुटमिहकथिता गोपनीया विधिज्ञैः॥२ अथ विशेषतः स्वस्वमुद्राः कथ्यं
ते। तत्र सूर्यस्य स्वमुद्रा। प्रसारितावुभौ हस्तौ देशेन तु नियोजितौ। अंगुष्ठौ विस्तृतौ कार्यौ मध्येंगुष्ठे च विन्यसेत्। पद्ममु
द्राख्यमाख्या सूर्यप्रीतिकरी सदा। अथ गणपतिमुद्रा। दंतपाशांकुशा बीजपूरलड्डुकसंज्ञिताः। पंचमुद्राः प्रयोक्तव्या ग
णेशार्चनतोषकाः॥१ उक्तौ नोक्तमुखा मध्यासरला बद्धमुष्टिका॥ लिंगमुद्राख्यमाख्याता सर्वागमविशारदैः॥२ वामेतरमु
ष्टीशववा दंतमुद्राः प्रदर्शयित्वा तर्जनीं वक्रां लांछवा मूलेंगुष्ठे प्रयोजयेत्॥३ पाशस्तु कथितो ह्येष दृष्टिजालनिबंधनः। अंकु
शः पूर्वमेव कथितः। बीजपूरकलड्डुकमुद्रे प्रसिद्धे। शिवस्याष्टौ मुद्राः॥ लिंगं योनि त्रिशूलाख्यमालेष्टाभीमृगात्मिकाः॥
त्रिशूलमुद्रा चाक्षमाला सुगमा॥ अथ प्रसारितं स्वबाह्ये श्लिष्टशाकं च वामतः। पराङ्मुखं तु तं कृत्वा वनयं परिकीर्तितं॥२
प्रसार्य दक्षिणं हस्तं तनावुपरिविन्यसेत्। प्रदर्शयेद्देवं वरः सर्वार्थसाधकः॥३ मृगमुद्राः श्वेकिका॥ तर्जन्यस्थवाक रवामं मंत्र·
कनिष्ठानाममध्यतः अंगुष्ठेनाक्रमेदपि प्रसृतं स्ववा प्रदेशिनी॥४ संमुखं च करं स्ववाम्कंधदेशे नियोजयेत्। षडंग १८२
कथितो ह्येष सर्वदिवहरिप्रियः॥५ विष्णोर्दशास्य मुद्राः॥ बिल्वं वेणुं गदां स्यं शंखश्रीवत्सकौस्तुभैः वापचक्रमयोना

थवनमालाहरिप्रिया॥५ बिल्वमुद्रा कथिता। वेणुगदामुद्रा प्रबोधिका॥ ऊर्ध्वप्रसारितांगुष्ठा वाममुष्टिस्थिता परा॥ षड्कमुद्रा
प्रसिद्धेयं जयदा सर्वदिक्ष्वपि॥१ पद्ममुद्रा शंखमुद्रा प्रबोधिका॥ स्ववोत्तानं वामदक्षं स्वंदहस्तं मधो मुखं। दक्षमध्यांगुलिर्द्वंद्वं वा
मांगुष्ठे नियोजयेत्॥२ वाममध्यांगुलिं दंतदक्षाधो नियोजयेत्। अन्यस्य तर्जनी वामो गुष्ठाग्रश्रुंखकिनी॥३ स्ववाक निष्ठं
दक्षात्तथा वामकनिष्ठिकां॥ दक्षतर्जन्यधः स्पर्शाद्दक्षांगुष्ठाग्रगामिनी॥४ सम्यक् प्रदर्शयेन्मुद्रां श्रीवत्सांकां हरिप्रियां॥ करौ
संमुद्रितौ स्ववा वामकनिष्ठकया वरं। कनिष्ठिकां समाक्रम्य वामां स्यावदक्षिणां॥१ तर्जनी च परिक्रम्य वामांगुलित्रयं तथा॥
मेवपरितया स्ववाम वक्षिन्मुखमाचरेत्॥३ अंगुष्ठौ धारयेदस्त्रं मध्यमांगुलिमध्यगौ॥ दर्शयेत्कौस्तुभाख्यस्य मुद्रा न्यदेशक
मम्भमः॥४ वामचक्रवनमाला सुगमा॥ नथागरुडमुद्रा॥ कनिष्ठेनेत्रसंयोज्य वर्जयोनि सर्मग्रयात्॥ उगधिक्ता प्रयोक्तव्याष
उनाम्नवर्मममता॥ पाशांकुशापद्ममुद्रा प्रबोधिकाः॥ वरानये च कथिते॥ अथ प्रसारितं स्ववाक्लिष्टशास्वं वरानने॥ पराङ्मु
खं तु ततः स्ववात्ववनयंपरिकीर्तितं॥२ प्रसार्य दक्षिणं हस्तं जान्वोरुपरिविन्यसेत्॥ प्रसृतं दर्शयेद्देवि वरः सर्वार्थसाध
कः॥३ द [illegible] मिरनामिकार्पिततर्जनी॥ मुद्रा विस्मयसंज्ञा स्यात विस्मयावेशकारिणी॥५ मुष्टिरूपा सतांगु

खोकु २

ष्ठादक्षिणानामद्रमुद्रिका।तर्जन्यंगुष्ठाग्रसंयोगात् वक्षारणावोसमावर्तिती।अथांगुष्ठेयुमलोरुवामुख्यासंलग्नयोर्द्वयो
ताचेवानिषुर्यानिमुद्रैषा कालकर्णिका।प्रसार्य दक्षिणं हस्तं वामहस्तपरिक्रमात्।कनिष्ठाद्यंगुलीनां च संको
चेन समानयेत्।इति क्षिप्य वाममंगुष्ठं मुष्टिं संवेष्टयेत् गुरुः।वामांगुलिनिरुद्धं यं कुर्यान्मुद्रामनीषिणः।७कुंचमुद्रा।
निषेकस्स्यात्पद्मपुष्पासनेतया।कालकर्णीप्रयोक्तव्या विघ्नप्रशामकर्मणि।अन्यविशेषाग्रेयगौरवान्नलिखि
ता।अथ जपस्मरणविधिः।एषा जपे च होमे च संख्या नोक्ता मनीषिभिः।तेषामष्टसहस्रं।एसंख्योक्ता जपहोमयोः।
यस्मिन्युगदितहोमे जपसंख्या विधीयते।तत्र सर्वत्र मंत्राणां संख्या दृष्टियुगक्रमात्।१कल्पोक्ता च कृते संख्या तां त्रे
तां द्विगुणां स्मृता।द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा।३कनिष्ठानामिकामध्या चतुर्थी तर्जनी स्मृता।तिस्रोंगु
ल्यस्त्रिपर्वास्युर्मध्यमा चैकपर्विका।मध्यपर्वद्वयं मध्यमाया जपकाले विवर्जयेत्।एकं मेरुं विजानीयाद्दूषितं ब्राह्मणास्त्रयं। मंत्र·
पत्रनामिकामध्यपर्वाधस्तर्जन्यनुक्रमाद्दश।गुनस्ताः प्रतिलोमेन जपमालां करे स्थिरे शोत।दश चासां नाद्यं कर्म तद् २८३
द्देवार्चनान्तकर्म।श्रित्य प्रागीरितं मंत्रि सुखः शुक्लो मौनी सब्रह्मचारी।निशाशीजपात्तत्रां तात्माशुक्लपत्तमनाः तद्

शुश्रूषांगोष्ठुतात्मनः।प्रयच्छग्रासेन्नूते पुष्पोदकं चानुकंपनं।मंत्राधिष्ठात्री देवीं वंदमानो गांदिवोधिवानात्रगुरुं
वरूवंचात्मीयं कर्म विर्माश्रमस्थं मंत्रं जपद्भिः स्नानकालेश्वर निषिद्धेदानमप्यापस्तद्धंर्वश्रजस्त्रं जंश्वानं समसज
प्तां जस्वाद्यं।अद्रेश्वंगेन द्यास्तटे बिल्वमूले तीये कद्र्भिगोकुले विष्णुगेहे शिवप्रसादे अश्वत्थाधश्चां बुधेश्च
नीरिस्थाने पवेते धासीनएकैकव्राणा कंमूलं फलं गोरूजवद्धिति मैक्ष्यंचंप्रन्नं समस्तकुदोग्धान्नं वेत्यादानः।हवि
तिधरादिरवरादिक्रमाच्छानं नेदे।नमो गाय्याचवामि नियमःका मिनीत्यो निवृत्तिः प्रातजती विटपसमिधां हितिवि
कावलहोपचारव स्यामधुरत्राम नंत्रस्य दृष्टस्यपत्रैः पूजादोमो कुसुमवसनालेपनाद्भक्त्या निः।१शिवस्यग्निसं
निधौ चीरवृत्ता रोम्पाश्चो कीलकान्यथा दिक्षु समारोप्यते पुष्पिकापालेश्च बलिंद्वातन्मध्ये कर्म चक्रशाजपस्थानमा
नावत्तरस्थानमुखस्थाने पूर्वानिसुखः पुरउपविश्य पञ्चषिदिंदो देवतां विन्यस्य स्वात्मविशुद्ध्यर्थमिष्टमहस्त्रं त्रषे
रत्नातं वागायत्रीं जपेत्।ततः उक्तम् रदिने प्रातः स्नानादिकं विधाय जपस्थानमागत्य कुर्वायवजन्यान्याराय त्रैरोति
अमुकदेवता यात्रमुकमंत्रसिद्धिकाम एतावत्संख्याकं जपं तद्दशांशा चमुकद्रव्यहोमदशांशतर्पणं तद्दशांश

१८

त्रिषेकात्मकपुरश्चरणमहं करिष्ये इति प्रतिज्ञां विधाय रुद्रदिक्स्थां देवतां स्मरन्। द्रुतं च बिलंबितं। प्रत्यहमुत्तमा स्या
अंगुलपर्वणा वामध्यादवर्गे विजपसमाप्तिर्यथा स्यादेवं जपं कुर्यात्। जपसंख्या यावती पूर्वदिने कृता तावती प्रत्यहं
कार्या। स्नानं प्रत्यहं त्रिषवणं। अशक्तौ प्रातर्मध्याह्ने च। तस्याप्यशक्तौ एकमेव स्नानं। स्नानकाले पंचविंशतिमंत्रजप्तज
लेनाद्यजलेनात्मा त्रिषेकः। यथोक्तविधिना देवार्चनं प्रत्यहं जपानंतरमुक्तद्रव्येण दशांशहोमं संस्कृतेऽग्नौ देवतां विभ
व्य स्वाहांतेन मंत्रेण कुर्यात्। दशांशतर्पणं च। मंत्रमुच्चार्य त्रिपुरां तर्पयामीति जले बिंदावम्यतन्मुखे जलमंजलि
ना क्षिपेत्। अत्र त्रिषेकोऽपि दशांशएव नाम्नांतमंत्रमुच्चार्य देवतां बुद्ध्या जलांजलिना समर्पणमात्रं विवक्षितं। अथवा ज
पसंख्यासमाप्तौ होमादिकं कुर्यात्। अन्नताद्विवर्जो नायनंकशाय्यायां इति मंत्रे पुरश्चरणविधिः। विस्तरस्तु
दीक्षापद्धतौ ज्ञातव्यः। अथ त्रिपुराया मुद्राः। ज्ञानार्णवे। शृणु देवि प्रवक्ष्यामि मुद्राः सर्वार्थसाधकाः। या विरचिता नि मंत्र
स्तु मां नित्यं त्रैपुरं जपते। परिवर्त्य करौ स्पष्टौ वद्धाङ्गुष्ठौ कारयेत् समौ। अनामे तर्गते स्पृष्ट्वा तर्जन्यौ कुटिलाकृती। कनिष्ठि २८४
के नियुंजीत निजस्थाने महेश्वरि। त्रिखंडेयं महामुद्रा त्रिपुरावानकर्मणि। मध्यमे मध्यमे ज्ञाक्रनिष्ठाङ्गुलिरोधको।

तर्जन्यौ दंडवत् स्वच्छा मध्यमोपर्यनामिके। एषा तु प्रथमा मुद्रा सर्वसंक्षोभकारिणी। एतस्या एव मुद्राया म
ध्यमे सरले यदा। ५ क्रियते परमेशानि सर्वविद्राविणी तथा। मध्यमा तर्जनीभ्यां तु देवशज्ञादावुपयुक्ताङ्गुलि
स्यते। आवाहनादिका मुद्राः प्रदर्श्य नियथाक्रमात्। या निर्विरचिता नित्यं मोदं ते मंत्रदेवता। ७ सम्यक् संपूरितः
पुष्पैः कराभ्यां रचितांजलिः। आवाहनाख्या कथिता मुद्रा देशिकसत्तमैः। ८ अधोमुखी त्वियं चेत् स्यात्स्थापनी मुद्रिका म
ता। आश्लिष्टमुष्टियुगला प्रोन्नतांगुष्ठयुग्मिका। ९ संनिधाने समुद्दिष्टा मुद्रेयं तंत्रवेदिभिः। अंगुष्ठगर्भिणी सैव सं
निरोधे समीरिता। १० देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः। सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी। ११ अवगुं
ठनमुद्रेयमभितो भ्रामिता मता। अन्योन्याभिमुखाश्लिष्टकनिष्ठानामिका पुनः। १२ तथा तर्जनीमध्येयं धेनुमुद्रा
प्रकीर्तिता। अमृतीकरणं कुर्यात्तया देशिकसत्तमः। १३ अन्योन्यग्रथितांगुष्ठा प्रसारितकरांगुली। महामुद्रेयमु २८५
द्दिष्टा परमीकरणे बुधैः। १४ प्रयोजयेदिमा मुद्रा देवतायोगकर्मणि। १५ पंचदश्या समाख्याताः। आदिर्योना एवयोगवा
द्दमाला प्रकीर्तिता। तदुत्पत्तिं समस्थेमणि निरुपमालो प्रकल्पयेत्। १६ रुद्राक्षमालिकां म्लेच्छ जपेतत्समनोरथप्रा

रुद्रैर्विहिता माला शत्रूणां नाशिनी मता ।२ कुशग्रंथिमयी माला सर्वपापप्रणाशिनी । पुत्रजीवफलैः प्रोक्ता कुरुते पुत्र
संपदं ।३ निर्मितास्त्वयमणि निजपि मालेप्सितप्रदा । हिरण्मयी विरचिता माला कामान् प्रयच्छति ।४ प्रवालैर्विहिता
माला प्रयच्छेत् पुष्कलं धनं । सौभाग्यं स्फाटिकी माला मौक्तिकैर्विहिता श्रियं ।५ निर्मिता शंखमणिभिः कुरुते कीर्तिमित्त
मां । सर्वैरेतैर्विरचिता माला स्यान्नुक्रयेद्गुणां ।६ अनामिकायां संविश्य करयोरुभयोरपि । अंगुष्ठमध्यमाग्रेण ग्रन्द्द
न्त्वं विधृत्य तु ।७ दक्षिणांगुष्ठमध्याग्रे संस्थमेकैकमाहृतं । प्रत्येकमात्तु शर्वेणाकर्षयन् जपमाचरेत् ।८ शतमष्टाधिकं
वै वक्त्रं पंचाशदेव वा । सप्तविंशतिसंख्या वा अक्षमालोपदिश्यते ।९ जपं कुर्वन्न कुर्वीत संख्याग्रंथिकं लंघनं ।
कृते जपस्य हानिः स्यात् तस्मात् कृते ज्ञात्वा तं जपेत् ।१० शिवपुराणे रुद्राक्षमालायां । एकवक्त्रे त्रिवक्त्रे वा चतुर्वक्त्रेऽथ पंचभिः
षट्वक्त्रैर्वापि कर्तव्य स्तस्मान्मिश्रैस्तु वर्जयेत् ।११ मुखे मुखे प्रकर्तव्यं मुखं मूलं विसर्जयेत् । नववात्रिकं तु कर्तव्यं मंत्र. १८५
पुर्ववस्तु खमिछता ।१२ नाशाय पापानां सा वित्तं ब्रह्माद्यायनवं भवा । स्वग्रंथितो रवं तु कर्तव्यं मेरुमेकं न लंघयेत् ।१३
पंचविंशतिमोक्षाय सप्तविंशतिपौष्टिके । त्रिंशत्तु धनमायुष्यं पंचाशदभिचारके ।१४ अथ वश्यादिकर्मापि यु

क्तानि षट्कर्माणि लिख्यंते ।। अभिधास्ये हितं तंत्रेऽस्मिन् सम्यक् षट्कर्मलक्षणं । सर्वतंत्रानुसारेण प्रयोगफल
सिद्धिदं । शांतिवश्यस्तंभनानि विद्वेषोच्चाटने ततः । मारणं तानि शंसंति षट्कर्माणि मनीषिणः ।१ रोगकृत्यग्र
हादीनां निराशः शांतिरीरिता । वश्यं जनानां सर्वेषां विधेयत्वमुदाहृतं ।२ प्रवृत्तिरोधः सर्वेषां स्तंभनं समुदीरितं ।
स्निग्धानां द्वेषजननं मिथो विद्वेषणं मतं ।३ उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्तितं । प्राणिनां प्राणहरणं मारणं
समुदाहृतं ।४ स्वदेवता दिक्कालादीन् ज्ञात्वा कर्माणि साधयेत् । रतिर्वाणी रमा ज्येष्ठा दुर्गा काली यथाक्रमात् ।५ षट्क
र्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत् । ईशचंद्रेंद्रनिरृतिवाय्वग्नीनां दिशो मताः ।६ सूर्योदयं समारभ्य घटिकादश
कं क्रमात् । ऋतवस्युर्वसंताद्या अहोरात्रं दिने दिने ।७ वसंतग्रीष्मवर्षाख्यशरद्धेमंतशैशिराः । हेमंतः शांतिके प्रो
क्तो वसंतो वश्यकर्मणि ।८ शिशिरः स्तंभने ज्ञेयो विद्वेषे ग्रीष्म ईरितः । प्रावृडुच्चाटने ज्ञेया शरन्मारणकर्मणि ।९ प
द्मासनं स्वस्तिकं च योनिकं विकटं कुक्कुटं पुनः । वज्रं भद्रकमित्यासनानि मनीषिभिः ।१० एषु शस्ताः क्रमतो ज्ञेयाप
स्मपायागदा कया । मुद्रास्याः निषद्याद्याः शांतिकादिषु कर्मसु ।१२ अजपांशांतिविधो रमतं वकोवा किरुदीरितं

स्तंभने पृथिवी ज्ञेया विद्वेषे व्योम कीर्तितं।२३ उच्चाटने स्मृतो वायुर्वह्निर्मारणे मतः। तत्तद्भूतोदये सम्यक् तत्तन्मंडल-
संयुतं।२४ तत्तत्कर्म विधातव्यं दर्शितानि शितार्चना। सितासु मलिलन्तोणी व्योम वायुर्हविर्भुजां।२५ मंत्राः स्युर्वर्णबी-
जानि षट्कर्मस्वपि यथाक्रमं। ग्रथनं च विदर्भश्च संपुटो रोधनं तथा।२६ योगः पल्लव इत्येते विन्यासाः षट्सु कर्मसु॥
मंत्रार्णांतरितान्कुर्यात्साध्यनामवर्णान्यथाविधि।२७ ग्रथनं तद्विधं ज्ञेयं प्रशस्तं शांतिकर्मणि। मंत्रार्णद्वंद्वमध्य-
स्थसाध्यनामाक्षरं लिखेत्।२८ विदर्भ एष कथितो मंत्रिभिर्वश्यकर्मणि। आद्यावंते च मंत्रः स्यान्मंत्रो सो संपुटः स्मृ-
तः॥२९ एष संस्तंभने शस्त इत्युक्तं मंत्रवेदिभिः। नात्र आद्यंतमध्येषु मंत्रस्य रोधनं मतं।३० विद्वेषणविधाने न प्र-
शस्तमिदमुच्यते। मंत्रस्यांते भवेन्नाम योगः प्रोच्चाटने मतः।३१ अंते नाम्नो भवेन्मंत्रः पल्लवो मारणे मतः। सितरक्त-
पीतमिश्रासितधूम्राः प्रकीर्तिताः।३२ वर्णतो मंत्रतः प्रोक्ता देवताः षट्सु कर्मसु। यंत्राणां लेखने द्रव्यं चंदनं रोचना नि- मंत्र·
शा।३३ गृहधूमं चिताङ्गारं मारणे च विषाणि च। रूपेनाग्निर्लोहपिंडा निधत्तूरकरसस्तथा।३४ गृहधूमस्तु कटुकं १८६
विषाष्टकमुदीरितं। देवताकालमुद्रादि सम्यक् ज्ञात्वा विचक्षणः।३५ षट्कर्माणि प्रयुंजीत तथोक्तफलसिद्ध-

ये।३६ रूपेनः श्येनविष्ठा। गृहगोधिका गोधिका। चित्रिचित्रकः। लोहपिंडानि। इति सर्वं विजानतः। क्रूरकर्मस्य तत्त्व
कर्म सिध्यति नान्यथेति। इति जलादितत्त्वोदयः। ऊर्ध्वं वह्निरधश्चापस्तिर्यक्कुक्षौ प्रभंजनः। तोणीमध्यपुटे ज्ञे-
या नभः सर्वत्र ईरितं।३६ इति वश्यादिकर्माणि सुरादयः। आरंभोपेक्षणीयं। शांतिवश्ये सौम्यातिथयः। अन्येषु क्रू-
राः। शांतिवश्ययो मृदु ध्रुव नक्षत्राणि स्तंभने। ध्रुव नक्षत्राणि मारणे तीक्ष्ण उग्र नक्षत्राणि। शांतिवश्ये च सौम्यवाराः
अन्येषु क्रूराः। शांतिवश्यस्तंभनेषु स्थिरलग्नानि अन्येषु चरलग्नानि। सौम्यकर्मसु नक्षत्राणि क्रूरकर्मसु तादृश-
न्नानि इत्यादयो नेके प्रकाराः तत्तत्र मंत्रजपादौ बोध्याः। इति मंत्राः संक्षेपतः उक्ताः। एतद्व्यतिरिक्ता मंत्रा
न्न जानीमः। तान्ग्रंथगौरवान्न लिखामः। नो— क्त नाम मंत्रः। मतं तंत्र वस्तु कार्यं निजात्र रवक्तुस वर्जिनी नमेत वा।
वाक्ची सुतायदिह गुप्ततमास्तु मंत्राः सौकार्यतोत्र न वतां कतिचित्तु एते।३७ प्रोपितं मंत्रसमूहरत्नं सर्वागमत्वे-
विविधागमेषु। व्यक्तीकृतं तन्मम मंत्रकोशो सुखं भजध्वां सुरविनो नवंद्य।३८ शिष्यो नरहसनाप तेषु एनिधेलश्रु-
नयो वस्थितो नाना प्रेमकरस्य सोऽजनि सुतः श्रीनः शिवादिसतः। आत्मादि समितीश्वरः सहस्तत्वान्स मंत्रर-

दि॰

श्रावनीकोशंकोश्रावनःश्मनो भवति किंदारिद्र्यनीतिशिवसि॥३ मंत्रकोशमिमं नकायः पठेन्नश्रृणुयादपि।
इहकामान वाप्येव स्वर्गलोके महीयते॥४॥ इति श्रीमदागमादित्य त्रिपाठि संगृहीते मंत्रकोशे मुक्तासमाप्तिको
पुरश्चरणकथनं नाम विंशतितमः परिच्छेदः॥ ॥संवत् १७७२ वर्षे माघमासे शुक्लपक्षे द्वितीयायां सोमवासरे
लिखितोयं मंत्रकोशः मुखानंद द्विवेदिना॥ ॥यावल्लक्ष्मीरोदधिः श्रीमान् यावन्मेरुगिरिः स्थिरः विस्मंत
एतेस्तावत्रावतिष्ठतु पुस्तकं॥१॥ अदृष्टदोषान्मति विभ्रमाद्वा यदर्थहीनं लिखितं मयात्र तत्सर्वमार्यैः परिशो
धनीयं प्रमादमाद्दक्षणं मुन्यति लेखकस्य॥२ ॥शुभमस्तु सर्वजगतः॥ ॥लेखकपाठकयोः शुभं॥

मंत्र॰
२८१